श्री जानीमहापात्रविरचितं

सूर्यारुण्यशतकम्

सम्पादको व्याख्याकारश्च
डा० परमानन्द शास्त्री

अनुवादिका
श्रीमती कान्ता 'नलिनी', एम० ए०

प्रज्ञा-प्रकाशन
मैरिस रोड, अलीगढ़

EF

श्रीं जानीमहापात्रविरचितं

सूर्यारुण्यशतकम्

सम्पादको व्याख्याकारश्च
डा० परमानन्द शास्त्री

अनुवादिका
श्रीमती कान्ता 'नलिनी', एम० ए०

प्रज्ञा-प्रकाशन
मैरिस रोड, अलीगढ़

I.B.C.
Rs 16.00

प्रकाशिका—श्रीमती कान्ता 'नलिनी' एम० ए०,
सिद्धार्थ सदन, मैरिस रोड, अलीगढ़ ।

मूल्यम् १६)

SURYARUNYASHATAKAM

Commentator and Editor : Dr. Parmanand Shastri,
Aligarh Muslim University, Altgarh

नेशनल प्रिंटिंग प्रेस, कनवरीगंज, धनियां बाड़ा, अलोगढ़

प्रास्ताविकम्

अलीगढ़मुस्लिमविश्वविद्यालये हिन्दीविभागाध्यक्षपदमलङ्कृतवतां बन्धुवरगोवर्धननाथशुक्लमहोदयानां सौजन्यात् तेषां पितृचरणानां दिवंगतश्रीयादवनाथशुक्लमहाभागानां संग्रहादधिगता सूर्यारुण्यशतकस्यैका हस्तलिपिर्मानसं मे तथोदकण्ठयद् यथा वाचयित्वैनामुन्नेतुं यत्नवानभूवम्। समजनि च तदनु मे मनसि हस्तनिर्मितस्य धूसराकाशवर्णस्य किमपि गुरुभारकर्गलस्य सार्धैकादशगुणिता र्धोनपञ्च 'इञ्च' आयतेषु (११$\frac{1}{2}$ × ४$\frac{1}{2}$) पुरातनत्वाज्जीर्णताचुम्बितेषु, सर्वतो भग्नकोणेषु, किञ्चिदपकीर्णपार्श्वेषु, मध्ये मध्येऽणुकीटानुरचिततनुतरच्छिद्रेष्वपि स्वच्छेषु, पार्श्वचतुष्टयेऽप्यङ्गुलद्वयपरिमितभागमुत्सृज्य लिखितेषु, प्रत्येकं नवपङ्क्तिषु, नवसु पर्णेषु पुरातनदेवनागराक्षरैरतिचारुभिर्लिखितोऽपि न तथाशु सुवाच्यो यत्र तत्र पार्श्वेषु विहितसंशोधनं कतिपयस्थलेष्वनुरचितपाठपरिवर्तनमिदं मनोहारि हस्तलिखितं काव्यं मुद्रापयित्वा विदुषामुपहरणीयमिति।

ग्रन्थान्ते कविना पद्यचतुष्टये स्वपरिचयोऽपि दत्त आस्ते। दिल्लीश्वर-शाहजहाँ-द्वितीय-पुत्रमुरादवख्शाश्रितोऽयं जानीनामा कविः गौडवंशोद्भवस्य गुर्जराधिपाणीरायसम्मानितस्य भारद्वाजगोत्रीयनीलकण्ठस्य विदुषः पौत्रो, जयदेवस्य पुत्रस्तथा विश्वनाथस्यानुज आसीत् मुरादबख्शादसावाशुकविः महापात्रेति उपाधि लब्धवान्। ग्रन्थस्य पुष्पिकायाम् 'इति पण्डितराजजगन्नाथान्तेवासिमहापात्रजानीविरचितमित्युल्लेखादस्य पण्डितराजशिष्यत्वं प्रतीयते। ग्रन्थकलेवरे शिखरिणीपद्यानां पदमैत्रीप्रभावो गङ्गालहरीमनुस्मारयम्स्तत्समर्थयन्निव व.भाति। 'अनवद्येषु पद्येषु वयं तु घटिकाशतम्' इति तस्य

गर्वोक्तिरपि तादृश्येव। सत्वरं पद्यशतं निर्माय स्वकवित्वशक्ति प्रदर्शयन्नेवायं संतुष्टान् 'मुरादबकसात्' महापात्रेत्यभिधां लेभ इति १०९ तमे पद्ये सुस्पष्टमेव।

सूर्यशतकमिव न काव्यनिष्टनिवारणात्मिका रचनोद्देश्यजनश्रुतिः सूर्यारुण्यशतकमनुसरति। प्रत्यक्षदेवं संबोध्य वर्णयतीत्यभिधीयतामिदं स्तोत्रमिति नाम परं देवरतिगाम्भीर्यमनपेक्ष्य काव्यकलाविलास एव कवयितुर्मनो रमत इति पदे पदेऽत्र काव्ये विचरतां स्वाभाविकी प्रतीतिः। कल्पनाद्भुतलास्यपोषितं शब्दशय्योपनतनादमाधुर्यं नियतगतिच्छन्दस्तरङ्गेषु भूयसा प्रवहमाणं मानसं पूरयितुमिव प्रवर्तते। मनोरागापेक्षया श्रुतिरागेऽधिकमनुरक्तेव कविसरस्वती माधुर्यप्रसादकूलयोः संविष्टापि कुत्रचित् प्रसङ्गवशाद् धूर्जटेर्जटागह्वरे हरहरायमानाया विबुधसरित ओजोऽप्यङ्गीकरोति। नेयं शब्दचित्रे रुचिमादधाति प्रत्युत शब्दैर्वर्ण्यवस्तुचित्राणि विनिर्माति विचित्रमर्थं चित्रयन्त्यपि च नार्थचित्रे परिनिविशते। कल्पनाचारुचित्रापि मनस्तोषायैव कल्पते। शाब्देषु च्छेकानुप्रास आर्थेषु चोपमा कवेः प्रियतमोऽलङ्कारः प्रतीयते।

तदिदं सूर्यारुण्यशतककाव्यमन्वयमुखेन सुरभारत्या व्याख्याय मया सम्पादितं नलिनीत्युपाह्वया एम० ए० उपाधिभूषितया कान्तया च ये कान्तया हिन्दीभाषायामनूदितं मुद्रणव्यन्तरप्रसादाद् यत्र तत्र पुष्पकण्टकमिव स्थितास्वपि त्रुटिषु निस्सारमपास्य सारं ग्रहयालूनां विमलशेमुषीणां काव्यरसमर्मज्ञानां बुधानां मुदे जायतामिति सप्रश्रयं मुहुर्मुहुः कामयते

सुधियां विधेयः
परमानन्दः शास्त्री

* सूर्यारुण्यशतकम् *

समायातुं प्रातर्विहितमनसो वासरमणेः
पुरो लक्ष्यं बिम्बं रुचिरमिव कुम्भं गणपतेः ।
लसत्सिन्दूराच्छच्छविमनुपमं किञ्चिदपि तन्
नमामः प्रोद्दामप्रचुरतरधाम क्षितिकृते ॥१॥

प्रातः काले समायातुं विहितं मनो येन तस्य, वासरमणेः, सूर्यस्य लसन्ती सिन्दूरवत् (पक्षे सिन्दूरेण) अच्छा प्रोज्ज्वला छविः शोभा यस्य तत्, अनुपमम् अतुलनीयम्, गणपतेः कुम्भमिव गजाननस्य मस्तकमिव रुचिरं रुचिं कान्ति रातीति कान्तिमदित्यर्थः, पुरः संमुखं लक्ष्यं दृश्यमानं बिम्बं मण्डलम् (यत्) किञ्चदपि अवर्णनीयमिति यावत्, प्रोद्दाम सातिशयं प्रचुरतरं च धाम तेजो यस्य एवं भूतं तत्, क्षितिकृते जगतीहेतोः, अथवा क्षयतेस्क्तिन्नन्तं रूपं क्षितिः क्षयः (दुरितानाम्) तस्य कृते नमामः । सिन्दूराञ्चितं गणपतेः कुम्भमिव शोभमानं प्रातरुदयमानस्य सूर्यस्य संमुखं दृश्यमानं प्रचुरतेजसा युतं रक्तवर्णं मण्डलं संसारस्य कल्याणाय पापानां विनाशाय वा नमाम इत्यर्थः । उपमालंकारः शिखरिणीवृत्तम्, रसै रुद्रै श्छिन्नैर्यमनसभलागः शिखरिणी इति तल्लक्षणम् । देवविषया रतिर्भावः ।

[प्रातः काल आने के लिए उद्यत सूर्य के, सिन्दूर से सुशोभित निर्मल-छवि-युक्त गणेश जी के मस्तक के समान, सामने दृश्यमान बिम्ब को, जो अवर्णनीय उत्कृष्ट और अत्यधिक ज्योतिर्मान् है, हम संसार के मङ्गल (अमङ्गल-नाश) के लिए प्रणाम करते हैं ॥१॥]

मयूराद्यै राद्यैस्तव विरचितेऽपि स्तवशते ।
सति त्वस्माकं भोस्तपन! कियती वाग्विरचना ।

तथापि त्वद्रूपान्नयनविषयाद् द्राक् समुदिता-

दुदेष्यत्येवासावुपचितवती हेतुगुणतः ॥२॥

भोस्तपन ! हे सूर्य ! मयूरः सूर्यशतकस्यप्रणेता बाणसम्बन्धी प्रसिद्धः कविराद्यः प्रथमो येषां तैराद्यैः पूर्वजैः विरचिते प्रणीते स्तवशते स्तुतिशते सत्यपि वर्तमानेऽपि अस्माकं वाग्विरचना मम काव्य-रचना कियती ? आक्षेपे प्रश्नः। को गुणः का च सत्ता मम रचनायाः पूवर्जानां मयूरादीनां सूर्यस्तुतिपरासु रचनासु सतीषुः ? न कोऽपीत्यर्थः। तथापि द्राक् समुदितात् प्रत्यग्रोदयं श्रितात् नयनविषयात् दृष्टात् त्वद्रूपात् तव रागभृताया आकृतेः कारणात् असौ मे रचना हेतुगुणतः हेतुभूतस्य तव गुणतः (पञ्चभ्यास्तसिल्) गुणस्य कारणात् उपचितवती वृद्धिमती उदेष्यति आविर्भविष्यति। तव उद्यत्प्रकाशं रूपं मम रचनायाः कारणं कारणगुणाश्च कार्ये संक्रमन्त इति आप्ता लोकानुभवश्च। अतः स्वयंप्रकाशत्वं रागोद्दीप्तिश्च मम रचनायामपि स्वतः संभाव्येत एवेति नाहं चिन्तयामि यत् पूर्वजानां मयूरादीनां रचनासु सतीषु का स्थितिर्मे रचनाया इत्यभिप्रेतम्। सूर्यस्य रूपं रचनाया उपचये कारणतामावहतीति काव्यलिङ्ग-मलङ्कारः। एवेति संशयस्य नितरामभावं व्यनक्ति।

[मयूर आदि पूर्ववर्ती श्रेष्ठ कवियों द्वारा रचित तुम्हारी सैकड़ों स्तुतियों के रहते मेरी रचना कितनी गुणवती होगी ? फिर भी प्रत्यग्र उदित तुम्हारे रूप के दृष्टिगोचर होने से वह भी कारण (तुम्हारे रूप) के गुणों से निश्चय ही समृद्ध (होती हुई) उदित होगी ॥२॥]

कवीन्द्रैः प्राचीनैर्व्यरचि बहुशः सूक्तिनिचयः

पदार्थेऽप्येकस्मिंस्तदपि मम गुम्फो गुरुगिराम्।

समुद्यन्नेकस्मिन्नरुणिमनि भानो ! तव गुणे

गुणेहास्नेहानां सुखयति पुरा मानसमसौ ॥३॥

हे भानो ! कस्मिंश्चिदेकस्मिन्नेव विषये प्राचीनैः श्रेष्ठैः सूरिभिः, बहुशः अनेकधा सूक्तिनिचयः सूक्तिसमूहो व्यरचि रचिता वर्तते, तथापि तव एकस्मिन् केवलेऽद्वितीये च अरुणिमनि गुणे रागे समुद्यन् असौ मम गुर्वीणां सारगर्भाणां गिरां सूक्तीनां गुम्फो रचनागुणानाम् ईहायां स्नेहो येषां तेषां, गुणाभिलाषिणां विदुषां मानसं चेतः पुरा अन्यापेक्षया प्राक् सुखयति आनन्दयति। केवलमेकमेव विषयमवलम्ब्य प्राचीनैरपि कविभिरनेकधा काव्यनिर्मितयः कृता वर्तन्ते तथापि तवारूण्यरूपमेकमेव विषयमवलम्ब्य रचिते मदीये काव्ये यदर्थगौरवं तत्तु गुणग्राहिणां मानसमन्यरचनापेक्षया झटिति सुखयिष्यतीति भावः। अन्येषां कवीन्द्राणां रचना न तथा सम्प्रसादासुखकरी च यथा मदीयेति वस्तुना वस्तुध्वनिः तेन च व्यतिरेकालङ्कारो व्यज्यते ॥३॥

[हे सूर्य ! एक ही विषय पर प्राचीन श्रेष्ठ कवियों ने अनेक प्रकार से सूक्तियाँ लिखी हैं, फिर भी केवल तुम्हारे लालिमा रूपी गुण पर मेरी गौरवपूर्ण वाणी का गुम्फन उदित होता हुआ गुणग्राहिता से स्नेह रखने वालों के मन को उन कवियों की रचनाओं की अपेक्षा पहले आनन्दित कर सकेगा ॥३॥]

अस्माकं वन्दनीयो जगति खलजनोऽप्यत्र यस्य प्रचारा-
दन्विष्यन्ते समन्तात् सहृदयजनाः शुद्धसौहार्दभाजः।
मार्तण्डोद्दाम-धाम-ज्वलदखिल-महीचारिजन्तौ तपतौ
शान्ते स्वच्छन्दमच्छं क इह घनतरुच्छायमिच्छेन्मनुष्यः ॥४

अत्र जगति खलजनोऽपि अस्माकं वन्दनीयोऽभिवादनयोग्यः, अपीति समुच्चये तेन साधुस्तु वन्दनीयोऽस्त्येवेति प्रतीतिः। यस्य खलस्य प्रचाराद् व्यापारादिति हेतौ पञ्चमी, शुद्धं सौहार्द्रं स्नेहं मैत्रीभावमिति भावस्तं भजन्ति तथाभूताः सहृदयजना भद्रपुरुषाः समन्तात् सर्वतः अन्विष्यन्ते स्पृहणीया भवन्तीत्यर्थः। मार्तण्डस्य

सूर्यस्य उद्दामधाम्ना प्रचण्डतेजसा ज्वलन्तो दह्यमाना अखिलाः सर्वे महीचारिणः स्थलचरा जन्तवः प्राणिनो यस्मिंस्तथाभूते तपतौ ग्रीष्मकाले शान्ते विरते सति को मनुष्य इह स्वच्छन्दं स्वेच्छया अच्छं घनतरुच्छायम् सघनवृक्षस्य च्छायाम् इच्छेद् अभिलषेत् न कोऽपीत्यर्थः,। वन्दनीयाः खलु खला यतस्तेषां सत्तात उद्विग्नो लोकः सज्जनान् मृगयते। निखिलान् पृथ्वीचरान् दहन्निव सूर्यो यत्र तपति तस्मिन् ग्रीष्मे ऋतौ शान्ते न कोऽपि जनो घनतरुच्छायमपेक्षते। सूर्यस्य प्रचण्डतेजसः कारणादेव सघनतरूणां छायाया महत्त्वम्। दुष्टानां कारणादेव सतां महत्त्वम् अङ्गीक्रियते दुष्टास्तु प्राचुर्येण सर्वत्र, साधवश्चान्वेषणीयत्वेनाल्पा एवेति व्यङ्ग्यम्। अत्र खलजन-तत्प्रचार-सहृदयान्वेषणानां तपतु-मार्तण्डज्वलन-घनतरुच्छायाभिलषणानां च बिम्बप्रतिबिम्बभावेनावस्थानाद् दृष्टान्तोऽलङ्कारः। स्रग्धरावृत्तम्।

[संसार में दुष्ट लोग भी हमारे वन्दनीय हैं क्योंकि उन्ही की गतिविधि के कारण शुद्ध स्नेहभाव से भरे सज्जन चारों ओर खोजे जाते हैं। पृथ्वी के समस्त प्राणियों को झुलसाने वाले सूर्य के उद्दाम तेज से परिपूर्ण ग्रीष्म ऋतु के शान्त होने पर कौन मनुष्य सघनवृक्ष की छाया को चाहता है ॥ (कोई नहीं)

अस्माकं स्वच्छ-सारस्वत-जलधि-मिलल्लोलकल्लोलदुद्यत्-
काव्य-स्फूर्जत्सदुक्ति-प्रकर-परिलसन्मौक्तिक-स्रग्धराणाम्।
वाग्गुम्फे कोऽपि दोषोऽप्यसदितरजने त्यक्तरोषोद्गमानां
सामर्थ्यादाशुबद्धो मरकत - सुषमां नूनमाविः करोति ॥५॥

स्वच्छे निर्मले, सारस्वते जलधौ वाणी-महोदधौ मिलत्सु मिथो घर्षत्सु लोलेषु चपलेषु कल्लोलेषु उद्दामतरङ्गेषु उद्यति अविर्भवति काव्ये स्फूर्जन्तः चञ्चन्तः सदुक्तिप्रकराः सूक्तिसमूहा एव परिलसन्ति शोभमानानि मौक्तिकानि तेषां स्रजां मालानां धराणां धारकाणाम्,

असतो दुष्टादितरे जने साधुजन इत्यर्थः, त्यक्तो मुक्तो रोषस्य कोपस्य उद्गमः प्रकटनं यैस्तेषाम्, अस्माकं मादृशकवीनां वाचां गुम्फे काव्य-रचनायां सामर्थ्यात् प्रतिभावैशिष्ट्याद् आशु यथा स्यात्तथा (क्रियमाणे काव्ये) बद्धोऽवधानतया समाविष्टो न तु असामर्थ्याज्जातो कोऽपि यः कश्चिद्दुर्लभो दोषो मुख्यार्थहतिरूपः काव्यदोषो नूनम् अवश्यमेव मरकतस्य सुषमां शोभाम् आविः करोति प्रकटयति। येषां तरङ्गायिते वाणीमहासागरे निर्मलानि सूक्तिमौक्तिकानि समुद्भवन्ति साधुजनेऽकुपितानां तेषां मादृशां कवीनां प्रतिभासामर्थ्या-दाशु काव्यं कुर्वताम् रचनायाम् (अनवधानतया) कदापि प्रविष्टो विरलो दोषस्तत्र मरकतवद् विलसन् 'निरङ्कुशाः कवयः, इति तेषां सामर्थ्यमेवोद्घोषयतीत्यर्थ समर्थानां यः कश्चिद् दोषोऽपि शोभाकरः इति भावः। परम्परितसाङ्गरूपकम्। मरकतसुषमामिति कथमन्यस्य सुषमामन्यो धारयतीत्युपमायां पर्यवसानान्निदर्शना अपि च नूनमित्यस्य समावेशाद् दोषो मरकतसुषमया संभाव्यत इत्युत्प्रेक्षापि इत्युभयोः सङ्करः। गौडी शैली, ओजोगुणः। स्रग्धरा छन्दः। म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयमिति लक्षणात् ।।५।।

[वाणी के स्वच्छ सागर की चञ्चल तरङ्गों के मध्य उदित काव्य (शुक्ति) में चमकते हुए सूक्ति-समूह रूपी सुन्दर मोतियों की माला धारण करने वाले, तथा सज्जनों पर रोष न करने वाले, हम जैसे कवियों की शैली में, प्रतिभा सामर्थ्यवश जल्दी-जल्दी रचना करते, यदि कोई दोष आ भी जाए तो वह मरकत मणि जैसी शोभा को ही प्रकट करता है ।।५।।]

यो निन्दामस्मदीयां क्वचिदपि तनुते यश्च तस्माच्छृणोति
द्वावप्येतौ हितौ मे दुरितचयहर्तिं संविधत्तः स्वतो यत्।
किंतु स्पर्द्धा-समिद्धान्तर-कलुष-तति-व्यापृतावित्यशङ्कम्
दुर्वाक्योद्गार - संशीलन-विधिवशतस्तौ वदेल्लोक एव ।।६।।

यः क्वचिदपि अस्मदीयां मामकीनां निन्दां तनुते करोति यश्च तस्मात् शृणोति कर्णे कुरुते, एतौ द्वावपि मे हितौ, यतः स्वतः स्वयमेव दुरितानां पापानां चयस्य समूहस्य हृतिं विनाशं संविधत्तः। किन्तु (तयोः) दुर्वाक्यो दुर्वचसोः उद्गारस्य भावजातस्य संशीलन-विधेः समीक्षणक्रियाया वशतः कारणात् "तौ स्पर्द्धयाऽतितिक्षया समिद्धानामुद्दीप्तानामान्तराणां हृदयस्थानां कलुषानां दुर्विचाराणा-मिति यावत् ततिभिः समूहै व्यापृतौ लिप्तौ (वर्तेते इति शेषः) इति अशङ्कं निःसन्देहम् लोको जन एव वदेत्। यो मे निन्दको यश्चास्य श्रोता द्वावपीमौ मे हितकारिणौ यतः स्वयमेव तौ मम दोषान् स्वकृतनिन्दया नाशयतः। तेषां दुर्वचनानि श्रुत्वा "तावेव असूयादग्धं कुविचारैः संभृतं च हृदयं धत्तः,' इति लोक एव स्वयं कथयेत् ।।७।।

[जो कहीं भी हमारी निन्दा करता है और जो उससे सुनता है वे दोनों ही स्वतः ही मेरे दोषों का नाश करते हैं। क्योंकि उनके दुर्वचनभरे उद्गारों पर विचार करते ही लोग कहने लगते हैं कि वे ही स्पर्द्धा के कारण उद्दीप्त आन्तरिक दोषों से ओत-प्रोत हैं ।।६।।]

सुकवि-कवितां श्रावं श्रावं विभाव्य च दूषणम्

यदि न लभते दुष्टो दृक्षूनकायितमप्यदः।

तदपि वदन-क्लान्त्या सद्यो मुहुः शनकैः पठ-

न्नहह मलिनामेतां कर्तुं व्यवस्यति साहसी ।।७।।

दुष्टः खलः सुकवेः कवितां श्रावं श्रावं पुनः पुनः श्रुत्वा दूषणं दोषं च विभाव्य अन्विष्य अपि यदि दृक्षु स्वयंकृतेषु दृष्टिपातेषु ऊनकायितु, स्वल्पम् ऊनात् ह्रस्वार्थे कप्रत्यये ऊनकं तदिवाचरितुम्, तत्क्षणं वदनम्लान्या विवर्णेन मुखेन मुहुः पुनः शनकैः पठन् साहसी एतां कवितां मलिनां कर्तुं व्यवस्यति प्रयतते 'अहह' इति खेदे। कृतान्वेषणोऽपि दुष्टो यदि पुनः पुनः श्रुतायां सुकवितायां दृष्टिप्रसारे-ऽपि च दोषलवमपि न पश्यति तदा शनकैः पठन् स्वविवर्णमुखच्छा-

ययैव तां मलिनां कर्तुं साहसं कुरुत इति साश्चर्यं खेदः इति भावः। अन्यस्य रचनायां दोषम् अनुपलभ्य दुष्टो हताशः स्वयं मलिनच्छायो भवतीति फलितार्थः। हरिणीवृत्तम् रसयुगहयैन्सौं मौ स्लौ गो यदा हरिणी तदा इति तल्लक्षणम् ॥७॥

[श्रेष्ठ कवि की कविता को सुन-सुनकर और देखकर दोष खोजने पर भी दुष्ट व्यक्ति जब तनिक सा भी दोष नहीं पाता तो तत्काल ही धीरे धीरे पढ़ता हुआ (ईर्ष्यावश) अपने मुख की मलिन छाया से ही उसे म्लान करने का दुःसाहस करने लगता है ॥७॥]

केचित्षाण्मासिकाः काव्ये कवयो मासिकाः परे।

अनवद्येषु पद्येषु वयं तु घटिकाशताः ॥८॥

केचित्कवयः काव्ये काव्य-रचना-विषये षाण्मासिका षण्मासान्तरालेषु कवितासर्जका इत्यर्थः। परे च मासिकाः। वयं तु अनवद्येषु उत्तमेषु निर्दुष्टेषु पद्येषु घटिकया शतं येषां तथाभूताः, घटिकामात्रेण पद्यशतं रचयितुं समर्था इत्यर्थः। अनुष्टुप् छन्दः।

[कुछ कवि काव्य-रचना में छह-छह महीने ले जाते हैं, कुछ महीने भर में रचना कर सकते हैं। हम तो दोष रहित पद्यों की रचना में 'घड़ीभर में सौ' वाले हैं ॥८॥]

भव-भीति-भञ्जन ! भगवन् ! भासां निधे ! भानो !

भावय नभोविभूषण ! भूयो-भूतिं गिरां विभवे ॥९॥

भवात् संसाराद् भीतेर्भयस्य भञ्जन ! विनाशक ! भगवन् भासां प्रभाणां निधे ! नभसो गगनस्य विभूषण ! गिरां विभवे वाचामैश्वर्ये भूयोभूतिं भूयसीं समृद्धिं भावय प्रदेहीत्यर्थः। आर्याच्छन्दः। वृत्यनुप्रासः।

[सांसारिक भीति का नाश करने वाले ! प्रभानिधे ! आकाश के आभूषण ! भगवन् ! सूर्य ! वाणी के ऐश्वर्य-क्षेत्र में (मुझे) बहुतसी समृद्धि प्रदान कीजिए ॥९॥]

गिरो गर्हागर्भा यदपि तरणे! वर्णनवशात्
परं तोषायै तद्वितरण! भवेयुस्तदपि ते।
दयाप्तो यातो यत्परिणमति चित्ते जनयितुः
शिशूनां दुर्वादोऽप्यमृतसमनादोपमवचः ॥१०॥

हे तरणे! हे सूर्य! यद् वर्णनस्य वशात् प्रसङ्गवशवर्णनान्मे गिरो ममोक्तयः गर्हा निन्दा गर्भे यासां तथाभूताः सन्ति। हे वितरण! एतद् यथास्यात्तथा (क्रिया विशेषणाम्) अपि ते तोषायै भवत्संतुष्टये भवेयुः। शिशूनां बालकानां दुर्वादः दुर्वचनमपि दयया आप्तः कृपया गृहीतः जनयितुः पितुः चित्ते मनसि यातः गतः अमृतस्य समस्तुल्यो नाद उपमा यस्य एवं भूतं वचः अमृतावर्जनध्वनसदृशध्वनिवद् वचः परिणमति जायत इत्यर्थः। हे सूर्य! प्रसङ्गवशात् मत्कर्तृके तव वर्णने निन्दापरकान्यपि वचनानि यत् संभाव्यन्ते तत्तु ते तथैव आह्लादनाय यथा शिशूनाम् स्खलिता अपि वाणी पितुः कर्णे अमृताव-र्जनमिव जायते इति भावः। दृष्टान्तोऽलङ्कारः स चामृतसमनादोपमेति उपमया संकीर्णः। अतः प्रारभ्य सप्तपञ्चाशत्तमपद्यपर्यन्तं शिखरिणी-च्छन्दस्तल्लक्षणं प्रागुक्तमेव।

[हे सूर्य! वर्णनवश (मेरी रचना में) निन्दापरक वचन भी आपको संतुष्टि ही देंगे क्योंकि अनुग्रह के साथ स्वीकार की गई बच्चों की स्खलित वाणी भी पिता के हृदय में जाकर अमृत उंडेलने जैसी ध्वनि के समान (आह्लादक) परिणति प्राप्त करती है।

प्रयागे कालिन्दीं सुरसरितमप्यापिदधतः
क्षणं शोणाद्वैतं जगति जनयन्तस्तव कराः।
सरस्वत्याः स्फूर्तिं विदधतु ममाप्यम्बुजपते!
तदेकीकुर्वाणाः पिहितमपि सारस्वतपयः ॥११॥

हे अम्बुजपते ! जगति संसारे क्षणं मुहूर्तमात्रं, शोणान्न द्वैतं यस्मिन् कर्मणि तद्यथा स्यात्तथा, क्रियाविशेषणमेतत्, सर्वत्र शोणमेव जनयन्तः कुर्वन्तस्तव कराः प्रयागे त्रिवेणीस्थले कालिन्दीं श्यामवर्णां यमुनां गङ्गाम् अपि आ समन्तात् अपिदधतः आच्छादयन्तस्तेन च पिहितमपि गूढमपि सारस्वतपयः सरस्वत्या (रक्तवर्णं) जलम् इति सर्वाणि एकीकुर्वाणाः (अनेकानि एकं संपद्यमानं कुर्वाणा इति अभूततद्भावे च्विः) मम अपि सरस्वत्या वाण्या स्फूर्ति स्फुरणं विदधतु कुर्वन्तु क्रमशः श्यामवर्णां शुभ्रां रक्तां च यमुनां गङ्गां सरस्वतीं च समानवर्णां कुर्वाणाः सूर्यस्य कराः मम वाचोऽपि स्फुरणं कुर्वन्त्विति भावः ।

[हे अम्बुजपते ! संसार में घड़ीभर के लिए सबकुछ लाल ही लाल कर देने वाली, प्रयाग में (श्यामवर्णा) यमुना और (शुभ्रवर्णा) गङ्गा को ढक लेने वाली और इसीप्रकार गुप्त रूप से बहने वाली सरस्वती के (रक्तवर्ण) जल को भी (अपनी लाल आभा से) समान कर देने वाली तुम्हारी किरणें मेरी वाणी को भी स्फुरित करें ।।१२।।

स्रजन्तः कैलासं सपदि परितो रत्नशिखरं
सुमेरोर्दर्पौंधं कमपि दलयन्तोऽरुणतराः ।
करास्तेऽमी हेमीकृतनिखिल-पाषाण-निवहाः
महाभासो मोदं ददतु शिवयोर्मोदनपराः ।।१२।।

कैलासं सपदि शीघ्रमेव परितः सर्वतः रत्नशिखरं स्रजन्तः स्वभासा रत्नमयशृङ्गं विदधतः, हेमीकृताः सुवर्णीकृता निखिलानां सर्वेषां पाषाणानां निवहाः प्रस्तरसमूहा यैस्तथाभूताः (अतएव) सुमेरोस्तन्नाम्नो देवपर्वतस्य कमपि दर्पौंधम् अवर्णनीयं गर्वं दलयन्तश्चूर्णयन्तः, अरुणतराः रक्ततराः महती भाः कान्ति येषां तादृशाः शिवयोः, शिवश्च शिवा चेति द्वन्द्वः (स्त्रिया पुमानिति पाणिनिसूत्रेण पुल्लिङ्गः शिव एव शिष्यते) तयोर्मोदनपराः प्रसादने चतुराः तव करा मोदं ददतु प्रसन्नतां वितरन्तु जनायेति शेषः । हिमशुभ्रो-

ऽपि कैलासो तेऽरुणतरैः करैर्भासमानो मणिशिखरमिव प्रतीयते, तेन च सुमेरो रत्नमत्ताजनितो दर्पो विलीयते शिवपार्वत्योश्च मोदो भवति इति भावः। कैलासं रत्नशिखरं जनयन्त इति तद्गुणालङ्कारो व्यज्यते। हेमीकृतेत्यत्रापि तथैव ॥१२॥

[कैलाशपर्वत को तत्काल ही सब ओर से रत्नमयशिखर बना देने वाली (और उसके) समस्त पाषाण-समूह को स्वर्ण बना देने वाली (इस प्रकार) सुमेरु के गर्व को चूर चूर कर देने वाली, शिव पार्वती को प्रसन्न करने वाली, अत्यन्त अरुण और विपुल कान्तियुक्त तुम्हारी किरणें (संसार को) प्रसन्नता प्रदान करें ॥१२॥]

क्षणं दृष्टे यस्मिन् हृदयमधिरोहत्यनुदिनम्
सहस्रांशो! राजा सपदि कृतवीर्यस्य तनयः।
स्फुरत्यन्ततः पुंसामविरतमभेदश्च युवयो-
स्तवेदं शोणत्वं तदिह मम खेदं शमयतु ॥१३॥

हे सहस्रांशो! सहस्रकरसूर्य! यस्मिंस्तव शोणत्वे दृष्टे अवलोकिते सति अनुदिनम् प्रतिदिनम्, कृतवीर्यस्य तनयो राजा हैहयवंशीयः कार्तवीर्यः सहस्रबाहुरर्जुनो नृपः क्षणं हृदयमनुरोहति स्मृतिपथमायाति, पुंसामन्तश्च मनुष्याणां हृदये च युवयोः सूर्यार्जुनयोरभेदोऽभिन्नता, उभयोरपि सहस्रकरत्वात् स्फुरति प्रतीयते। तव (तथाभूतम) इदं शोणत्वमरुणिमा मम खेदं खिन्नतां शमयतु हरतु। स्मरणालङ्कारः ॥१३॥

[हे सहस्रांशु सूर्य! तुम्हारी जिस लालिमा को देखकर प्रतिदिन कृतवीर्य का पुत्र राजा सहस्रबाहु याद आ जाता है और लोगों के मन में तुम दोनों की अभिन्नता प्रतीत होती है, वह मेरे खेद को शान्त करे ॥१३॥]

जरद्वल्लीवृक्षा नवदलसमुल्लासरुचिरा
वनेभा विस्फूर्जन्निखिलतनु-सिन्दूर-सुभगाः।

पुलिन्दा यत्स्फूर्तौ मुनय इव काषायवसना

द्रढीयांसं रागं दिशतु स हि नो बालतरणिः ॥१४॥

यत्स्फूर्तौ यस्मिन्नुदिते जरत्यो जीर्णाः वल्ल्यः लताः वृक्षाश्च नवानां दलानां पत्राणां समुल्लासेन इव रुचिरा मनोहरा भवन्ति। वनेभा वनहस्तिनः येन विस्फूर्जता प्रसरता निखिलायां तन्वां समग्रे शरीरे सिन्दूरेण सुभगाः शोभिता जायन्ते, पुलिन्दा भिल्लाश्च काषायवसना गैरिकवस्त्रधारिणो मुनय इव प्रतीयन्ते। स हि बालतरणिः, उदयकालीनः सूर्यः नोऽस्माकं द्रढीयांसम् (दृढ+ईयसुन्) अतिशयेन दृढं रागं भक्तिभावं काव्ये सरसत्वं च, दिशतु ददातु। बालारुणाभायां जीर्णा लतावृक्षा नवकिसलयैरिव शोभमानाः, वन्या गजाः समस्तशरीरे सिंदूरलिप्ता इव पुलिन्दाश्च गैरिकवस्त्रधारिणो मुनय इव प्रतीयन्ते इति भावः। सर्वत्रापि उत्प्रेक्षाऽलङ्कारः। आद्यपादयोर्गम्याऽन्यत्र च सा श्रौती ॥१४॥

[जिसकी आभा में जीर्ण लतावृक्ष मानो नव किशलयों के फूटने के कारण, तथा वन्य गज मानो समूचे शरीर पर सिन्दूर के लेप से सुशोभित प्रतीत होते हैं, और पुलिन्द नामक जनजाति के लोग गेरुए वस्त्र धारण किए हुए मुनियों से लगते हैं, वह बालसूर्य हमें दृढ राग (अनुराग) प्रदान करे ॥१४॥

पुरस्तात्प्रत्यूषे भवदरुणिमानं निमिषतो

ममान्तर्बाल्यस्योल्लसति महतीयं प्रबलता।

त्रयीमूर्तौ त्वय्यप्यहह ! यदि रागं वितनुते

परेषां लोकानामथ दिनपते ! का खलु कथा ॥१५॥

हे दिनपते ! सूर्य ! प्रत्यूषे उषःकाले पुरस्तात् सम्मुखं भवतोऽरुणिमानं रागं निमिषितः पश्यतो मे अन्तर्बाल्यस्य मदीयमनसि वर्तमानस्य बालभावस्य इयं महती प्रबलता उत्सुकता उल्लसति उदेति (यत्) त्रयीमूर्तौ वेदत्रयरूपे त्रिदेवस्वरूपे वा त्वयि अपि यदि रागं वितनुते

प्रसरति अथ तर्हि परेषाम् अन्येषां लोकानां जनानां का कथा खलु ? वैवश्यमेव तेषामिति यावत् । न ज्ञानिनं रागो व्याप्नोति । ज्ञानस्वरूप-वेदत्रयीरूपस्त्वमपि चेद् रागमयोऽपरः को रागमुक्तो भवितुमर्हतीति भावः ॥१५॥

[हे सूर्य ! प्रातःकाल ही सामने की ओर तुम्हारी अरुणिमा को देखते हुए मेरे मन में स्थित बाल्यभाव के कारण प्रबल उत्सुकता उठती है कि यदि वेदत्रयीमूर्तिस्वरूप तुम पर भी 'राग' (लालिमा और लिप्तता) छा जाता है तो दूसरे लोगों का क्या कहना ॥१५॥

उषःसन्ध्योपासानियमधृतकाषायवसनः

पुरस्तादास्ते यत्प्रतिदिनमयं कश्यपसुतः ।

तवाभा शोणा भात्यनिशमत एव ग्रहपते !

जनास्तां कैस्तर्कैः क इह कतिधा नाभिदधते ॥१६॥

हे ग्रहपते ! उषसि सन्ध्योपासायां प्रातः सन्ध्योपासनासमये नियमेन धृतं काषायवसनं गौरिकवस्त्रं येन स कश्यपसुतः अरुणः (सूरसूतोऽरुणोऽनूरुः काश्यपिर्गरुडाग्रज इत्यमरः) प्रतिदिनं ते पुरस्तात् सम्मुखे आस्ते । अतएव तव आभा कान्तिः अनिशं प्रतिदिनं शोणा अरुणा भाति । जनास्ताम् इह कैस्तर्कैः कतिधा नाभिदधते ? लोका विभिन्नैस्तर्कैरनेकप्रकारेण तस्या वर्णनं कुर्वन्तीति काक्वाक्षिप्तप्रश्नाद् व्यज्यते ॥१६॥

[हे ग्रहपते ! उषाकाल में सन्ध्योपासना के लिए नियम से गेरुए वस्त्र धारण करने वाले कश्यपसुत अरुण प्रतिदिन तुम्हारे सामने रहते हैं इसलिए प्रतिदिन तुम्हारी कान्ति अरुण दिखाई पड़ती है । कितने लोग कितने तर्कों के साथ कितने प्रकार से इसका वर्णन करते हैं ! १६॥

सुवर्णाण्डं भित्त्वा सरसिरुहयोनेरनुदिनं

दिशां यात्रामैत्रीमवसि मनसीति स्फुरति नो।

यतस्त्वत्तेजोभिस्तपन ! तपनीयं हि परितः
प्रतप्तं प्रत्यूषे भवदरुणिमानं प्रथयति ॥१७॥

हे तपन ! सूर्य ! अनुदिनं प्रतिदिनं सरसिरुहयोने ब्रह्मणः सुवर्णाण्डं हेमाण्डं—ब्रह्माण्डमिति यावत्, भित्त्वा विच्छिद्य दिशां यात्रामैत्रीमत्रसि यात्रां करोषीत्यर्थः । इति मे मनसि स्फुरति एवमहं जाने । यतः त्वत्तेजोभिः परितः सर्वतः प्रतप्तं तपनीयं स्वर्णम् (एव) प्रत्यूषे प्रातःकाले भवदरुणिमानं तव रागं प्रथयति वर्धयति । प्रतिदिनं हैमं ब्रह्माण्डं भित्त्वा दिशां यात्रां करोषि तच्च हेम तव तेजोभिः प्रतप्तं सत् तवारुण्यं वर्धयतीत्यभिप्रायः । उत्प्रेक्षालङ्कारः ॥१७॥

[हे सूर्य ! मेरे मन में यह विचार आता है कि आप प्रतिदिन स्वर्णिम ब्रह्माण्ड को फोड़ कर दिशाओं का यात्रा-सम्बन्ध बनाए रखते हैं (और) ब्रह्म के टूटे हुए सुवर्णाण्ड का सोना तुम्हारे तेज से तपकर तुम्हारी अरुणिमा को बढ़ा दिया करता है ॥१७॥

विहाय द्राङ् निद्रामलसतनुपूर्वाद्रिसरसी-
सरोजाली-स्फूर्जन्मधुरसभरे खेलनरसं
न का वा जानीते प्रसृतकरहंसस्य भवतो
वपुः शोणं पश्यन्त्युषसि जगतीवाभिजनता ॥१८॥

जगति संसारे उषसि प्रत्यूषे शोणं रक्तं वपुः शरीरं बिम्बमिति यावत् पश्यन्ती अवलोकयन्ती का अभिजनता समूहार्थे तल्प्रत्ययः, जनसमूह इत्यर्थः, भवतः प्रसृतकरहंसस्य, प्रसृताः करा यस्य सचासौ हंसस्तस्य (प्रसारितकिरणहस्तस्य सूर्यरूपमरालस्य द्राक् शीघ्रं निद्रां विहाय प्रातः प्रबुध्य अलसतनुना सालस्येन शरीरेण पूर्वाद्रौ उदयाचले सरसीषु सरोवरेषु सरोजालीनां पद्मसमूहानां स्फूर्जत उच्छलतो मधुरसस्य मकरन्दस्य भरे आधिक्ये खेलनरसं क्रीडाऽऽनन्दं न जानीते न वेत्ति ? सर्वोऽपि जनो वेत्त्येवेत्ति काकुध्वनिः । उषःकाले सूर्यस्य रक्तवर्णं बिम्बं पश्यन् सर्वोऽपि जनो जानाति यदयं सूर्यरूपो हंसः

किरणरूपिकरान् प्रसार्य उदायाचले तेषु सरोवरेषु विकसतां कमलानां क्षरन्मकरन्दानां मध्ये क्रीडां करोति ततश्च लग्नेन मकरन्देनास्य वपुः शोणं जातमिति भावः। प्रसृतकरहंसेति श्लिष्टं परम्परितं रूपकम्। मधुरं क्रीडनमित्युत्प्रेक्षा तदिहानयोः संकरः। स च मधुरसखेलायाः शोणत्वस्य हेतुत्वेन परिणमन्त्या मुहुरपि काव्यलिङ्गेन संकीर्यते ॥१८॥

हे सूर्य! प्रातःकाल आपके रक्तवर्ण शरीर को देखकर संसार में कौन लोग नहीं जानते कि प्रातःकाल उठते ही अलस शरीर सूर्य रूपी हंस अपने किरणरूपी हाथ फैलाकर उदयाचल पर स्थित सरोवरों में उगे कमलों के छलकते हुए मकरन्दवैभव में क्रीडा किया करता है ॥१८॥

सखायं मे चन्द्रं निजकमहसासावुपचिनो-
त्यहो दीर्घं धत्ते त्रिजगति तुषारं निगिलति।
इतीवारक्तेन प्रतिदिनमुपास्यो ध्रुवमये
वसन्तेन श्रीमान् दिशतु भविकं नो दिनमणिः ॥१६॥

अये इति संबुद्धौ। 'असौ सूर्यः मे सखायं मम मित्रं चन्द्रं निजकेन स्वकीयेन महसा तेजसा उपचिनोति वर्धयति। अहो दिनं दीर्घं धत्तो करोति त्रिजगति त्रिभुवने तुषारं हिमं निगिलति विनाशयति इति विचार्य (इवेति उत्प्रेक्षायाम्) आरक्तेन सर्वतो भावेन अनुरक्तेन वसन्तेन मधुना प्रतिदिनं दिने दिने ध्रुवमवश्यम् उपास्यः उपासनायोग्यः श्रीमान् दिनमणिः सूर्यः भगवान् नोऽस्मभ्यं भविकं मङ्गलं दिशतु ददातु। उत्प्रेक्षालङ्कारः ।१६।

'यह मेरे मित्र चन्द्रमा को अपने तेज से समृद्ध करता है, दिन को लम्बा बनाता है, तीनों ही लोकों में अन्धकार को निगल जाता है' मानो यह सोचकर वसन्त जिसे सदा अपना उपास्य मानता है वह दिनमणि सूर्य हमें मङ्गल प्रदान करे ॥१६॥

प्रगे शोणं दृष्ट्वा तव तपन ! बिम्बं सुरपति-
र्घनस्पर्द्धाबिद्धो धनुरुपधितो बिम्बमरुणम् ।
चिकीर्षन् दुर्जातं त्यजति च मुहुः सामि घटितम्
तदेतज्जानीमः क इह विवरीतुं प्रभवति ॥ २०॥

हे तपन् ! सूर्य ! प्रगे प्रातःकाले तव शोणं रक्तं बिम्बं मण्डलं दृष्ट्वा घनयाऽधिकया स्पर्धया मत्सरेण विद्धो युक्तः सुरपतिरिन्द्रः धनुषः इन्द्रधनुषः उपधितो व्याजाद् अरुणं बिम्बं चिकीर्षन् कर्तुमिच्छन् दुर्जातं दुर्घटितं (तत्) सामिघटितम् (एव) त्यजति मुञ्चति। तत् तस्माद् एतज्जानीमो ज्ञातुमुत्सुकाः स्मः यत् इह बिम्बविषये कः अपरः कः विवरीतुं वरतरो भवितुं प्रभवति शक्नोति। इन्द्रधनुः सामिघटितबिम्बत्वेन संभावितमित्युत्प्रेक्षालङ्कारः। सा च धनुरुपधित इत्यपह्नवेन संकीर्णा ॥२०॥

[हे सूर्य ! प्रातःकाल तुम्हारे अरुणवर्ण मण्डल को देखकर स्पर्धा-वश धनुष के वहाने लाल रंग का बिम्ब बनाने के इच्छुक इन्द्र ने अच्छा न बनने के कारण अर्धनिर्मित ही त्याग दिया। अब यह देखना (जानना) है कि (अन्य) कौन अच्छा बना पाता है ॥२०॥]

धरित्रीं ध्वान्ताब्धौ धरणितनयेन ग्रहपते ।
सवित्रीं संमग्नामहितमहसोद्धर्तुं मनसा ।
समानीतो मन्ये प्रतिपदमुपास्य प्रणमता
कृतानेकस्वेनारुणतनुरुदीतो जयसि तत् ॥२१॥

हे ग्रहपते ! नक्षत्रपते ! कृता अनेके स्वे आत्मरूपाणि येन धृतानेकरूपेण, महितमुत्कृष्टं महः तेजो यस्य तेन धरणितनयेन भूमिसुतेन मङ्गलग्रहेण ध्वान्तस्य तमसः अब्धौ सागरे संमग्नां निमग्नां सवित्रीं स्वजन्मदात्रीं धरित्रीम् उद्धर्तुं मनसा उन्नेतुकामेन प्रतिपदं पदे पदे प्रणमता उपास्य संपूज्य आनीतो भवान् अरुणतनुः रक्तशरीर उदीत उद्गतः तत् तस्माच्च जयति सर्वोत्कृष्टत्वेन वर्तते इति मन्ये।

रात्रौ भूमिस्तमः सागरे पतिता तत्पुत्रेण रक्तवर्णेन मङ्गलेन तामुद्धर्तुं सूर्यं आनीतः। पदे पदे तस्योपासनां कर्तुं स्वं बहुरूपं कृतवान्। तस्यैव रक्ताभयाऽयं रक्तो जातः सूर्यः सर्वोत्कृष्टः प्रतीयत इति भावः। उत्प्रेक्षालङ्कारः ॥२१॥

[हे सूर्य ! लगता है अन्धकार के सागर में डूबी हुई अपनी मां पृथ्वी का उद्धार करने की इच्छा से अत्यन्त तेजस्वी (रक्तवर्ण) मंगल अपने आपको अनेक में परिवर्तित करके पग-पग पर प्रणाम करता हुआ तुम्हारी उपासना करके लाया (उसकी आभा के कारण ही) तुम अरुण शरीर धारणकर उदित हो ॥२१॥

वियोगात्कोकानामथ दिनमनु प्राणसुहृदां
सरोजानां मन्ये तव तपन ! तापः प्रभवति।
इदं जातादग्नेरुषसि ततया कीलशिखया
समुल्लस्य प्रायो भवदरुणिमा दीव्यतितराम् ॥२२॥

हे सूर्य ! कोकानां चक्रवाकानां वियोगाद् विरहाद् अथ दिनम् अनु दिनावसाने च प्राणसुहृदां प्राणप्रियाणां सरोजानां कमलानां (वियोगात्) तव तापः संतापः प्रभवति जायते। उषसि प्रातःकाले प्रायः अग्नेरनलात् जाताद् (वियोगात्) ततया प्रसूतया कीलशिखया ज्वालाशिखया हेतुभूतया समुल्लस्य उन्नतिं प्राप्य भवदरुणिमा तव रागः दीव्यतितराम् सुतरां प्रकाशते। कोकानां मिथो वियोगात् संतप्तः सूर्यो दिनसाने स्वयमपि प्राणवत्प्रियाणां कमलानां वियोगात् संतप्ततरो जायते पुनरुषसि अग्नेरपि समुत्पन्नाद् वियोगाद् उज्जृम्भितया ज्वालया दीप्तिं प्राप्य तस्यारुणिमा नितरां प्रकाशते इति भावः। अस्तंगतः सूर्योऽसौ विलीय पुनरुषसि तस्मात्तेज आदायोदेतीति पौराणिकी वार्ता। उत्प्रेक्षालङ्कारः ॥२३॥

हे सूर्य ! मानो चकवों के वियोग से तथा दिनान्त में प्राणप्रिय कमलों के वियोग से तुम्हें संताप होता है। फिर उषकाल में अग्नि से वियुक्त होते हुए उसकी लपटों के अनुभाग से उद्दीप्त होकर आपकी लालिमा और भी अधिक चमकने लगती है ॥२२॥

शिशुः शङ्के यावद्दिनकर ! भवाँस्तावदरुणं
ततः शुभ्रं धत्से वसनमनुरूपं हि वयसः।
प्रति प्रातः प्रागाभरणमत एवारुणतनू-

रनूनं दूनानां दुरितहरमोजो विकिरसि ॥२३॥

हे दिनकर ! यावद् भवान् शिशुस्तावद् अरुणं रक्तवर्णं वसनं वस्त्रं धत्से परिदधासि। ततः (गते च शैशवे) वयसोऽवस्थाया अनुरूपं शुभ्रं श्वेतं वस्त्रं धत्से। यतः प्रातः काले भवान् शिशुरेव भवति रक्तं च परिधानमङ्गीकुरुते अत प्रतिप्रातः अरुणतनूः रक्तवपुः सन् दूनानां रात्र्यन्धकारदुःखितानां दुरितहरं कष्टविदारकं प्रागाभरणम् प्राच्या दिशो भूषणं च अनूनम् प्रचुरम् ओजः तेजः विकिरसि सर्वत्र प्रसारयसि। प्रातःकाले वाल्योचितारुणवसन-धारणादेव सूर्योऽरुणः प्रतीयते इति भावः। उत्प्रेक्षाऽलङ्कारः।

हे सूर्य ! प्रतीत होता है कि जब तक आप शिशु रहते हैं तब तक लाल और उसके पश्चात् अवस्था के अनुसार श्वेत वस्त्र धारण करते हैं। तभी तो प्रत्येक सवेरे तुम लाल आकृति (दिखते हुए) दुःखी लोगों का कष्ट हरने वाला तथा प्राची दिशा का आभरणरूप प्रचुर तेज (सर्वत्र) बिखेरा करते हो ॥२३॥

प्रति प्रातर्मन्ये दिवसकर ! बर्हिर्मुखगणाः
प्रणामोत्कण्ठास्ते हरिदिशि सदा संनिदधते।
तदास्योल्लासानामरुणमहसां द्रागरुणिमा
त्वदालोके लोके दिनमनु समालोक्यत इह ॥२५॥

हे दिनकर ! प्रति प्रातः बर्हिर्मुखगणा बर्हिरग्निर्मुखे येषां ते गणाः शिवस्य गणास्ते तुभ्यं प्रणामे उत्कण्ठा येषां तथाभूतास्त्वां नमयितुमुत्सुकाः सन्तः हरेरिन्द्रस्य दिशि पूर्वस्यां दिशि संनिदधते अतिसामीप्येन दत्तावधानास्तिठन्ति। तेषाम् आस्यात् मुखाद् उल्लास उद्गमनं येषां तेषामरुणमहसाम् इह अग्नीनां रक्तभासाम् अरुणिमा

आरुण्यम् (एव) त्वदालोके तव तेजसि त्वयि दृष्टे वा दिनमनु प्रतिदिनम् इह लोके संसारे समालोक्यते दृश्यते इति मन्ये तर्कयामि। उत्प्रेक्षालङ्कारः।

[हे सूर्य ! मानो प्रत्येक प्रातः (शिव के) अग्निमुख गण तुम्हें प्रणाम करने की उत्सुकता से पूर्व दिशा में देखते रहते हैं। संसार में तुम्हारे दीख पड़ने पर उन्हीं के मुखों से उठने वाली अरुण आभाओं की लालिमा प्रतिदिन दिखाई पड़ती है ॥२४॥

पुरस्ताद् भासन्ते तपन ! रथिनस्ते रुचिभृतो
महाश्वानां मन्ये गलमधिगता देवमणयः ।
त एव त्वां देव ! क्षणमनुदितं तावदरुणं
स्रजन्तः साधूनामुषसि बहुधोक्तीर्विदधते ॥२५॥

हे तपन ! हे सूर्य ! रथिनो रथारूढस्य ते पुरस्तादग्रे महतामश्वानां गलमधिगताः कण्ठस्थिता रुचिभृतः कान्तिमन्तो देवमणयः (देवमणिः अश्वकण्ठाधस्ताद्रोमशस्थानविशेषः कौस्तुभं च) भासन्ते भ्राजन्ते हे देव ! त एव स्वाभया त्वामनुदिनं उषसि प्रतिदिनमरुणं स्रजन्तो विदधतः बहुधा अनेकधा साधूनां सतामुक्तीर्वचनानि विदधते कारयन्ति इत्यर्थः उत्प्रेक्षालङ्कारः सा च तद्गुणेन सकीर्यते ॥२५॥

[हे सूर्य ! लगता है, मानो रथ पर तुम्हारे आगे (जुते हुए) विशाल अश्वों के गले में कान्तिमती देवमणियाँ हैं। हे देव ! वे ही उदित होने से पहले क्षणभर के लिए तुम्हें (अपनी आभा से) रक्तवर्ण बनाती हुई सज्जनों से अनेकप्रकार से वचन-रचना कराती है ॥२५॥

सुपर्वभ्यः सप्तस्वपि तनुषु शर्वोऽर्ककुसुमा-
र्चनैस्तुष्टः कामान् वितरति ततस्तत्वं करुणया
सनाम्नां तद्द्रूणामपि सुमभरे शोणिमवरं
निधातुं मन्येऽच्छो जयसि विलसच्छोणिमभरः ॥२६॥

सप्तसु तनुषु पृथ्वीजलाग्निगगनवायुहोतृचन्द्रस्वरूपासु प्रत्यक्षमूर्तिषु अर्ककुसुमैः अर्कनाम्नः पादपस्य पुष्पैरर्चनैः पूजनैस्तुष्टः प्रसन्नः शर्वः शिवः सुपर्वभ्यो देवेभ्यः कामान् मनोवाञ्छितानि फलानि वितरति ददाति। ततस्त्वम् ईशस्याष्टममूर्तिरूपः करुणया समानं तव तुल्यं नाम येषां तेषां तद्द्रूणाम् प्रसिद्धानाम् अर्कवृक्षाणामपि सुमभरे पुष्पविभवे शोणिम्नाम् अरुण्यानां वरं निधातुं विधातुम् अच्छो निर्मलः विलसन् शोभमानः शोणिम्नांः भरः समूहो यस्य स एवंभूतो जयसि सर्वोत्कर्षेण वर्तस इति मन्ये। सुरैरर्ककुसुमैरर्चितः शिवस्तेभ्यो मनोवाञ्छितानि वितरति शिवस्य अष्टममूर्तिरूपो भवान् सनाम्नाम् (अर्काणाम्) वृक्षाणां पुष्पेषु अरुणिमानं धातुमेवारुणो जयस इति भावः ॥२६॥

पृथ्वी जल आदि सात प्रत्यक्षमूर्तिस्वरूप शिव, अर्कवृक्ष के फूलों द्वारा पूजाओं से प्रसन्न होकर, देवताओं को (अभीष्ट) फल प्रदान करते हैं, तो (शिव की अष्टम मूर्तिस्वरूप) तुम करुणावश अपने समाननाम वाले उन (अर्क) वृक्षों के पुष्पों में श्रेष्ठ लालिमा भर देने के लिए स्वच्छ और मनोहर लालिमा से भरपूर होकर सर्वोत्कृष्ट हो ॥२६॥

सुमैरास्माकीनैर्गिरिशमभिपूज्येतरजनाः
समृद्धिं विन्दन्ते किमिति न वयं तां विनुमहे ॥
स्वशोणिम्ना प्रातः प्रतिदिनमितीवार्कतरुभिः
कृतार्चो वर्चोभिः स्फुरसि हरमूर्तेऽरुणतरैः ॥२७॥

हे हरमूर्ते! शिवमूर्तिस्वरूप! आस्माकीनैरस्मदीयैः सुमैः पुष्पैः गिरिशं शिवम् अभिपूज्य पूजयित्वा इतरजनाः अपरे लोकाः समृद्धिं विन्दन्ते प्राप्नुवन्ति (तत्) वयं किमिति तां समृद्धिं कथं न विनुमहे प्राप्नुयामः, इतीव एवं विचार्येव अर्कतरुभिः प्रतिदिनं स्वशोणिम्ना स्वशोणवर्णैः पुष्पैरिति यावत् कृतार्चः पूजितः सन् अरुणतरैः रक्ततरैः वर्चोभिस्तेजोभिः स्फुरसि दीव्यसि। हेतूप्रेक्षालङ्कारः ॥२७॥

[हे शिवमूर्ति स्वरूप सूर्य ! मानो यह सोचकर कि दूसरे लोग हमारे पुष्पों से शिव को पूजकर समृद्धि प्राप्त करते हैं तो हम क्यों नहीं करें" अर्क तरुओं द्वारा प्रतिदिन अपने लाल पुष्पों से पूजित होकर और भी अधिक अरुण हुई अपनी किरणों से सुशोभित होते हो ।।२७।।

तवाभा स्वाभाव्यादरुणमहसो वासरमुखे
विखेदं मे धत्तां दुरितचयसत्तान्तक ! मनः ।
यदासारादारात् कनकति मुदो विद्रुमभरत्य-
तोषा योषानां रजतधनमुक्ताफलगणे ।।२८।।

हे दुरितानां पापानां चयस्य समूहस्य सत्ताया अस्तित्वस्य अन्तक विनाशक ! वासरमुखे प्रत्यूषे अरुणमहसो रक्ततेजसस्ते आभा कान्तिः स्वाभाव्यादिति स्वार्थे ष्यञ् स्वभावादेवेत्यर्थः मे मनः विखेदं खेदरहितं धत्तां करोतु । यस्याः आसारात् प्रसभं वर्षणात् कनकति स्वर्णवत्प्रतीयमाने विद्रमुभरति विद्रुमाणां प्रवालानां भर आधिक्यं तदिवाचरति रजतधनं मुक्ताफलगणश्च तयोः समाहारस्तस्मिन्, रुप्यमौक्तिकनिचये योषानां स्त्रीणां मुदो हर्षस्य अतोषा अविश्रान्तिरित्यर्थः । अयमत्राशयः, बालारुणस्य महता रजतमयानि मौक्तिनिर्मितानि च भूषणानि कनकविद्रुममयानीव भान्ति येन योषितां मुदो मनसि नैव मान्ति ।।२८।।

[हे पापसमूह को नष्ट करने वाले सूर्य ! प्रातःकाल स्वभाव से ही अरुणतेज वाले आपकी आभा जिस की वर्षा मे चाँदी और मोतियों के समूह के सोने और मूंगे के समान प्रतीत होने पर स्त्रियों की प्रसन्नता संतोष नहीं कर पाती, मेरे मन का खेद दूर करे :

सुखं श्वेतद्वीपे परमचिति नित्यं विहरतो
हरेर्नेत्रं जाने दिनकर ! भवानेव नियतम् ।

यतः शोणत्वं ते सुरतरसमग्नाम्बुधिसुता-
सरागौष्ठ-प्रेमालस-हसलसच्चुम्बनकृतम् ॥२९॥

हे दिनकर ! भवान् नियतम् अवश्यं नित्यं श्वेतद्वीपे परमचिति परमचैतन्यस्वरूपे आत्मनि विहरतः सच्चिदानन्दस्वरूपस्य हरेर्विष्णोः नेत्रं नयनमिति जाने । यतो हि ते शोणत्वमारुण्यं सुरतस्य रतिक्रीडाया रसे आनन्दे मग्नाया अम्बुधिसुताया लक्ष्म्या सरागेन सालक्तकेन ओष्ठेनाधरेण प्रेमालसेन प्रेममयत्वान् मन्थरेण हासेन यच्चुम्बनं तेन कृतं जनितम् वर्तते । हेतूत्प्रेक्षालङ्कारः ।

[हे सूर्य ! अवश्य ही तुम श्वेतद्वीप में परम चैतन्य में सानन्द विहार करने वाले (चिदानन्दस्वरूप) विष्णु के नयन हो, क्योंकि तुम्हारी यह लालिमा रति क्रीडा के रस में निमग्न लक्ष्मी के लालिमा लगे अधर द्वारा प्रेमालस मुस्कान के साथ जड़े हुए चुम्बन के कारण है ॥ २९ ॥

**घनेभ्यो यच्छन्तो घनरसमिदं मण्डनकृते
यदेते शोणाभं दधति परितो वैद्युतमहः ।
तदेतेषां भानो जलजकुलजीवातव इमाः
प्रतीमः प्रत्यूषे दिनकराणामरुणिताः ॥३०॥**

एते (दिनकर कराः) घनेभ्यो मेघेभ्यो घनं रसं बाष्परूपम् अधिकं जलं यच्छन्तो वितरन्तो मण्डनकृतेऽलङ्कृतये परितः सर्वतः शोणाभं रक्तवर्णं वैद्युतमहः विद्युतस्तेजो दधति गृह्णन्ति, तत् तस्मादेव कारणाद् एतेषां भातः (दिनकरकराणां) कान्त्या जलजानां कमलानां कुलस्य समूहस्य जोवातवे जीवनौषधये प्रत्यूषे उषःकाले दिनकर-कराणां सूर्यस्य किरणानाम् इमाः अरुणिताः अरुणा भाः इति प्रतीमो जानीमः । पूर्वार्धे परिवृत्तिरलङ्कारः । उत्तरार्धे तूत्प्रेक्षा ।

[बादलों को खूब जल देते हुए सूर्य के कर (किरणें) स्वयं (बादलों से ग्रहण कर) अलङ्कार रूप में रक्ताभ विद्युत्-तेज को धारण करते हैं । प्रतीत होता है उसी कान्ति के कारण उषःकालीन किरणों में कमलसमूह की जीवनौषधिरूप अरुणिमा विद्यमान है ।

अये चक्षुस्तथ्यं त्वमरुणमरीचिर्यदुदये

स्फुटं लोके शोणं भवति नयनं मीलनवशात् ।

त्रिलोकीलोकानां जलधितनयाभर्तुरथवा

त्रिनेत्रस्याहोस्वित्तदिति न हि विद्मो वयममी ॥३१॥

[अये ! अरुणा मरीचयो यस्य तथाभूतस्त्वं चक्षुः (असीति) तथ्यं सत्यमेव । (यतः) नयनं नेत्रं मीलनवशात् निमीलनात् शोणम् अरुणं भवति इति लोके जगति स्फुटं प्रसिद्धमेवास्ति । (किन्तु) त्रिलोकी लोकानां त्रिजगद्वासिनाम् अथवा जलधितनयाया लक्ष्म्यः भर्तुः विष्णो,: आहोस्विद् अथवा त्रिनेत्रस्य रुद्रस्य (चक्षुरसि) इति तु अमी वयं न विद्मो नैव जानीमः । हे सूर्य ! अरुणमरीचिस्त्वं सत्यं चक्षुरेव । चक्षुर्हि मीलनाद् रक्तं जायत इति लोके प्रसिद्धं त्वमपि मीलितोऽस्तं गतोऽरुणो भवसीति नेत्रता ते सिद्धा, किन्तु कस्य नेत्रमसि ? त्रिलोकी-वासिनाम् ? विष्णोः ? अथवा रुद्रस्येति नो जानीम इत्यर्थः । पूर्वार्धे काव्यलिङ्गमलङ्कारः मीलनवशादिति वाक्यार्थस्य चक्षुस्त्वे हेतोः प्रतिपादनात् । उत्तरार्धे तु सन्देहोऽलंकारः ॥

अरे ! अरुण किरणों वाले तुम सचमुच चक्षु हो, क्योंकि मुंदने से चक्षु लाल हो जाता है । यह लोक में प्रसिद्ध है । किन्तु तुम किसके चक्षु हो—त्रिलोकी वासियों के ? विष्णु के ? या शिव के ? यह हम नहीं जानते ॥३१॥

उषः काले भाले पतदरुणलाक्षारसनिभं

महस्ते मीनाक्ष्याः सशपथनतेऽपि प्रियतमे ।

स्वयं रक्तं रक्तिं रचयदपि चित्रं वितनुते

मनोरागं नागन्तुकमपि सपत्नीरतिमते ॥३२॥

उषः काले प्रातःकाले लाक्षारसनिभं लाक्षारसतुल्यं स्वयं रक्तम् अरुणम् (अन्येषामपि च) रक्तिम् अरुणिमानं रचयत् कुर्वत् ते तव सूर्यस्य महस्तेजः भाले पतत् मस्तके संक्रमत् सत् प्रियतमे प्रिये सशपथं यथा स्यात्तथा नतेऽपि नायं परकीयायाश्चरणलाक्षारस इति सशपथं सनति प्रतिपादयत्यपि, मीनाक्ष्याः स्वकीयाया अङ्गनायाः

सपत्नीरतिमते सपत्नीसुरतविषयेऽनागन्तुकमपि नोपपद्यमानमपि मनोरागम् ईर्ष्यारूपं तनुते विस्तारयति इति चित्रम्, आश्चर्यकरम्। पूर्वार्धे भ्रान्तिमान् अलंकारो व्यङ्ग्यः। तृतीयपंक्तयां तु विरोधाभासः, चतुर्थपादे च विभावनायाः प्रतीतिः ॥३२॥

प्रातः काल में लाक्षारस जैसा, स्वयं रक्त एवं दूसरों को भी अनुरक्त कर देवे वाला तुम्हारा तेज, मस्तक पर पड़ता हुआ, (और इस प्रकार सपत्नी के चरण का अलक्तक-सा प्रतीत होता हुआ) प्रियतम के शपथपूर्वक चरणनत हो जाने पर भी, स्वकीया नायिका के मन में (अन्यथा कभी न आने वाले) सपत्नीरतिविषयक (ईर्ष्या) भाव को भी उत्पन्न कर देता है। यह आश्चर्य की बात है ॥३२॥

सरागां ग्लोः श्यामां रजनिमधिगत्यैव रमसे।
निलीय क्वाप्यस्यामथ विगतवत्यां तु सहसा।
जटाधारी योगी भवसि विलसद्रक्तवसनः
क्षणाद्वेषं मुञ्चन् भ्रमसि किमुतायं दिनमणे! ॥३३॥

हे दिनमणे! सरागां रागेण (रक्तवर्णेन, अनुरागेण च) युक्तां ग्लोः चन्द्रमसः (ग्लौः मृगांकः कलानिधिरित्यमरः) श्यामां श्यामाख्यां नायिकां श्यामवर्णां च (शीतकाले भवेदुष्णा उष्णकाले च शीतला सर्वावयवशोभाढ्या सा श्यामा परिकीर्तिता इति श्यामालक्षणाम्) रजनिं रात्रिम् अधिगत्य प्राप्य क्वापि निलीनो गूढः सन् रमसे हर्षम् अनुभवसि भुङ्क्षे च। अथ ततोऽस्यां क्वापि विगतवत्यां कुत्रापि विलीनायां क्षणाद् क्षणमात्रेण वेषं मुञ्चन् विलसन्ति शोभीनि रक्तवसनानि काषायवस्त्राणि यस्य तथा भूत्वा जटाधारी रश्मिरूपिजटाधारको योगी (योगः कमलनीभिः संयोगोऽस्यास्तीति) भवति। किमुतेति वितर्के। रात्रौ चन्द्रमसः प्रेयसीं श्यामां रात्रिं गत उपपतिः सूर्यः क्वापि निलीनस्तां भुङ्क्ते प्रत्यूषे चाकस्मात् तस्यां गतायां निर्विण्णत्वाज्जटाश्च गैरिकवसनानि च परिधाय योगी जायते। सरागादिविशेषणबलान्नायकयोश्चौर्यरतिव्यापारप्रतीतिरिति समासोक्तिरलंकारः ॥३३॥

हे सूर्य ! (रात्रि में) चन्द्रमा की प्रेयसी रागवती श्यामा रात्रि को पाकर कहीं छुपकर उसके साथ रमण करते हो और अकस्मात उसके चले जाने पर अपना (नागर) वेश त्यागकर क्या काषाय वस्त्रों से सुशोभित जटाधारी योगी हो जाते हो ? ३३॥

पलाय्य त्वामन्धे तमसि बत ! कुत्रापि निभृतं
निलीनं तारेन्द्वाद्यनधिगतमेताभिरमराः।
प्रदीपज्वालाभिः सुरपतिपुरोऽन्विष्य तरणे !
नयन्तीत्याशङ्के भवदरुणिमा तज्जनिरयम् ॥३४॥

[हे तरणे ! सूर्य ! पलाय्य दूरे गत्वा कुत्रापि निभृतं मौनम् अन्धे तमसि गहनेऽन्धकारे निलीनं निगूढम् अत एव तारेन्द्वाद्यनधिगतं तारा नक्षत्राणि इन्दुश्चन्द्रस्ते आद्या मुख्या येषां तैरनधिगतम् अप्राप्तं त्वाम् अमरा देवाः प्रदीपज्वालाभिः दीपिकाभिरन्विष्य मार्गयित्वा सुरपतिपुरो देवेन्द्रनगर्या अथवा इन्द्रस्य पुरत एव नयन्तीति अयं भवतो अरुणिमा रागस्तस्माज्जन्म यस्य तथाभूतः तस्मादुत्पन्नः इत्यर्थः । शंके इत्युत्प्रेक्षायाम । त्वं कुत्रापि गहनेऽन्धकारे गत्वा विलीनो नक्षत्रचन्द्रैरन्वेषितोऽपि न प्राप्तः। अमरास्त्वां दीपिकानां प्रकाशेऽन्विष्य प्राच्यां स्थितात् इन्द्रस्य नगरान्नयन्ति इति हेतोस्ते लज्जायाः कारणादयं रागो जात इति भावः। अन्योऽपि कश्चित् कृतापराधो राजपूरुषग्रहभयात् कुत्रापि निलीनो भवति । आरक्षिभिरन्विष्य ततो नीयमानश्च लज्जामनुभवन् मुखमण्डले रक्तो जायते ।

[हे सूर्य ! भागकर कहीं घोर अन्धकार में चुप-चाप छिपे हुए तुम्हें तारों और चन्द्रमा आदि द्वारा अप्राप्त (जानकर) देवतालोग दीपक प्रभाओं से खोजकर इन्द्रपुरी से अथवा इन्द्र के सामने ले जाते हैं। लगता है यह अरुणिमा उसी (लज्जा) के कारण से है ।

रसे मग्नः कान्ताधरमधुरसास्वादरसिको
दिनादौ तद्ध्यानादधिकलितताद्रूप्यसुषमः।
अतो हेतोः शोणोऽनलसविधकोणोदितशिखा-
परीतोऽनुप्रातर्जयसि जगदानन्दतरणे ! ॥३५॥

हे संसारस्यानन्दरूप सूर्य ! कान्तायाः प्रियायाः अधरमधुनो रसास्वादस्य रसिकस्त्वं दिनादौ प्रातः काले रसे मग्नः सन् तस्या ध्यानात् निरन्तरस्मरणात् अधिकलिता अधिगता ताद्रूप्यस्य तस्या-एव रूपस्य सुषमा येन एवंभूतः । अतो हेतोरस्मात् कारणात् अनल-स्याग्नेः सविधे समीपे कोणे उदिताभिरुद्गताभिः शिखाभिरर्चिभिः परीतो युक्तः प्रातः काले जयसि सर्वोत्कर्षेण वर्तसे इत्यर्थः ।।३४।।

हे जगदानन्द सूर्य ! प्रियतमा के अधरमधु रसास्वादन के रसिक तुम प्रातः काल में उसके (एक निष्ठ) ध्यान के कारण (तन्मय होने में) उसीका रूप-सौन्दर्य प्राप्त कर लेते हो । तभी तो अग्नि के समीप वाली (आग्नेय कोण की समीपस्थअर्थात् पूर्व) दिशा में उदित [प्रभा] शिखाओं में व्याप्त एवं रक्तवर्ण होकर सर्वोत्कृष्ट हो ।।३५।।

परिच्छेत्तुं शक्तः क इव तव रूपं दिनपते !
तथाप्यस्मानेषः मुखरयति वैप्री मुखरता ।
सुरासिन्धौ मग्नस्त्वमधिनिशमर्क ! स्वयमभू-
स्तदुन्मादोल्लासादरुणिमभरोऽयं विलसति ।।३६।।

हे दिनपते ! सूर्य ! तव रूपं परिच्छेत्तुं परिज्ञाय वर्णयितुं क इव शक्तः कः समथः ? न कोऽपीत्यर्थः । तथापि एषा मनसि वर्तमाना वैप्री विप्राणामियममित्यण् विप्रसम्बन्धिनो मुखरता वाचालता, नः मुखरयति वाचालयति । हे अर्क ! अधिनिशम् (विभक्त्यावव्ययीभावः) रात्रौ, त्वं स्वयं सुरायाः मद्यस्य सिन्धौ सागरे मग्नोऽभूर्निमग्नो जातः । तस्माद् उन्मादस्य उन्मत्ततायाः उल्लासाद् उद्भवाद् अयम् अरुणिम्नो रागस्य भरो विपुलता विलसति शोभते ।।३६।।

[हे सूर्य ! तुम्हारे रूप का कौन वर्णन कर सकता है ? फिर भी ब्राह्मणों वाली मुखरता हमें वाचाल बना रही है । तुम रात में स्वयं सुरा के सागर में गोता लगा गये । उसी से उत्पन्न उन्माद के उदित होने से तुम्हारा यह आरुण्याधिक्य सुशोभित है ।।३६।।

रवे ! त्वद्भाः शोणं प्रतिसदनमिन्दीवरदृशां
दृशः कोणं दृष्ट्वा नमितशिरसा चाटुवचसा ।
घनाश्लेषं लब्ध्वा किमिदमिति कौतूहलभृतां
प्रियेणालोक्यन्ते सरसमुपकारप्रणयतः ।।३७।।

हे रवे ! सूर्य ! त्वद्भास्तव (रक्तवर्णाः कान्तयः) प्रतिसदनं प्रतिगृहम् इन्दीवरदृशां कमलाक्षीणां दृशश्चक्षुषः [कोणं प्रान्तभागं (कोपात्) शोणं रक्तवर्णं दृष्ट्वा नमितशिरसा नतमूर्ध्ना चाटुवचसा सामानि कथयता प्रियेण पूर्वस्यां दिशि रक्तवर्णं किमिदम् उदेतीति कौतूहलभृतां कुतूहलवतीनां '(भयकारणात्) घनं गाढम् आश्लेषम् आलिङ्गनं लब्ध्वा प्रियेण उपकारस्य प्रणयतः उपकृतस्नेह-सद्भावेन सरसं सप्रीति बिलोक्यन्ते दृश्यन्ते । रात्रिं यावत् सामवचनै-रपि मानिनीनां मानमपनेतुमक्षमाः प्रियाः अरुणोदये तु गगनेऽरुणिमानं प्रसृतं विलोक्य किमिदमिति शङ्कापरीतास्ता मानिन्यो मानं विस्मृत्य झटिति भयाद् दयित गाढमालिङ्गन्ति । एवं सूर्यस्यारुणरश्मिभिरुप-कृतास्ते प्रीत्या स्नेहेन च ता अवलोकयन्तीति भावाः । समाधिर-लङ्कारः, समाधिः सुकरं कार्यं कारणान्तरयोगतः' इति मम्मटः ।।८७।।

[हे सूर्य ! प्रत्येक घर में सुन्दरियों के नयनकोण को (कोप के कारण) रक्तवर्ण देखकर सिर झुकाए प्रियवचन कहने वाले विलासी प्रिय 'यह क्या है' ऐसे कहती हुई (डरी हुई) उन प्रियतमाओं के गाढ आलिङ्गन को प्राप्त करके तुम्हारी (उदयकालीन रक्तवर्ण) किरणों को प्रेमभरी कृतज्ञ दृष्टि से देखते हैं। भाव यह है कि रात-भर प्रियवचन कहते रहने पर भी कुपित मानिनियों के मान को दूर करने में असमर्थ (नायक जब अकस्मात् तुम्हारी अरुण आभा से रंगे गगन को देखकर डरी हुई प्रियतमाओं को स्वतः अपने हृदय से कसकर लगा हुआ पाते हैं तो कृतज्ञता भरी दृष्टि से तुम्हारी उस आभा को देखते हैं।

विजानीमः सायं वरुणदिशि संकेतवशतः

समायातां सन्ध्याजलजदृशमास्वाद्य रमसे ।

भृशं रक्तां रक्तः कथमपि जहासि त्रिजगती-

जने जाग्रत्यन्तस्तपसि च दिनेश ! प्रतिदिनम् ॥३८॥

हे दिनेश ! सायं दिनावसाने संकेशवशतः मिलनसंकेतकारणात् वरुणदिशि पश्चिमदिशायां समायाताम् आगतां सन्ध्याजलजदृशं सन्ध्यासुन्दरीम् आस्वाद्य सम्भुज्य रमसे रमणं करोषि तथा रक्तोऽनुरक्तस्त्वं भृशमत्यधिकं रक्तामनुरक्तां तां त्रिजगतीजने त्रिभुवनजने जाग्रति एव निद्रापरिहारे सति कथमपि अतिकठिनतयैव जहासि मुञ्चसि । एवं च प्रतिदिनम् अन्तर्मनसि तपसि दह्यस इति जानीमो विद्मः । उत्प्रेक्षालङ्कारः ॥३८॥

हे सूर्य ! हमें लगता है कि तुम सायंकाल संकेतवश (मिलन के लिए निश्चित) पश्चिम दिशा में आयी हुई संध्या सुन्दरी को चूमकर उसके साथ रमण किया करते हो और प्रतिदिन (प्रातः) त्रिभुवन के लोगों के जागने पर उस अत्यन्त अनुरागिणी का, अनुरागी तुम जैसे-तैसे छोड़ पाते हो और प्रतिदिन मन ही मन संतप्त होते रहते हो (तुम्हारी लालिमा उसी ताप के कारण है)

अये ! शोणत्वं ते किमिति हृदि तत्त्वं विमृशतां

सतामन्तस्तर्काननुदिनमिहार्कानुतनुते ।

अहं त्वेतन्मन्ये चरमनगतः संनिपतना-

दथोच्चैरारोहादुदयगिरिमौलेः श्रमकृतम् ॥३९॥

अये ! अर्क ! ते शोणत्वं किम् ? तवारुण्यं कस्मात् कारणात् ? इति तत्त्वं हृदि विमृशतां विचारयतां सतां विदुषाम् अंतर्हृदये अनुदिनम् प्रतिदिनम् तर्कान् अनुतनुते प्रसारयतीति अहं त्वेतन्मन्ये इदं जाने (यत्) चरमनगतः पश्चिमपर्वताद् अस्ताचलात् संनिपतनाद् गिरणात् अथ तत्पश्चाच्च उदयगिरिमौलेः उदयाचलशृङ्गस्य उच्चैरुत्तुङ्गं यथास्यात्तथा (क्रियाविशेषणमेतत्) आरोहात् आरोहणात् श्रमकृतम्

परिश्रमाज्जातं वर्तत इति शेषः । उत्प्रेक्षालङ्कारः ।

हे सूर्य ! तुम्हारी लालिमा किस कारण है ? यह प्रश्न सोचने वाले विद्वानों के मन में प्रतिदिन तर्कों का प्रस्तार किया करता है मैं तो यह मानता हूँ कि वह अस्ताचल से गिरने और फिर उदयाचल पर ऊँचे चढ़ने के परिश्रम से प्रसूत है ।। ३९।।

स्फुरत्तारामुक्तावलिमपहरन्निन्दुवदनां
द्विजेषु क्रोशत्सु प्रतिदिनमहो रात्रिवनितां
निहत्यैतद्रक्तप्लुतवपुरुदीतो मुनिभिर-
प्यनालोक्यः शङ्के त्वमसि बत पङ्केरुहपते ! ।।४०।।

हे पंकेरुहपते ! कमलपते सूर्य ! द्विजेषु पक्षिषु ब्राह्मणेषु च क्रोशत्सु कूजत्सु शपत्सु च प्रतिदिनम् अनुदिनम् इन्दुरेव वदनं यस्यास्तां रात्रिवनितां निहत्य मारयित्वा स्फुरन्तीं दीप्तिमतीं तारामुक्तावलिं नक्षत्रमौक्तिकमालाम् अपहरन् चोरयन् तस्या रात्रिवनिताया रक्तेन प्लुतं रुधिरेण लिप्तं वपुर्यस्य तथाभूत उदितोऽत एव मुनिभिरपि अनालोक्यः द्रष्टुमयोग्यः पातकित्वादिति शङ्के । नोदयन्तं भास्करं पश्येदिति धार्मिकाः । तारामुक्तावलीन्दुवदना रात्रिवनितेति रूपकम्, रक्ताप्लुतित्वं मुनिभिरनालोक्यत्वे कारणमिति काव्यलिङ्गम् श्लिष्ट-विशेषणसामर्थ्यात् हन्तुः पुरुषस्य हतायाः स्त्रियश्च प्रतीतिरिति समासोक्तिरपि तत्त्रयमपि उत्प्रेक्षाया अङ्गभूतम् ।

हे सूर्य ! मुझे शंका है कि तुम प्रतिदिन खगरूपी ब्राह्मणों के कोसते रहने पर भी चन्द्रमुखी रात्रि रूपी सुन्दरी की हत्या करके उसके खून से लथ-पथ चमचमाती हुई तारा रूपी मोतियों की माला का अपहरण करने से मुनियों द्वारा भी अदर्शनीय (घोषित) होते हो ।।४०।।

निशां प्राप्य प्रायः कितव ! रमसेऽन्धे तमसि नः
क्षिपन्नित्याताम्रद्युतिमुखतयाविःकृतरुषः

हरिद्वध्वः कर्णाभरणविलसत्पल्लवचयै

र्यदाजघ्नुर्मन्ये तदियमरुणा तेऽरुण ! तनूः ॥४१॥

'हे कितव ! शठ ! अन्धे तमसि घोरान्धकारे नः अस्मान् क्षिपन् पातयन् त्वं प्रायो नित्यं निशां प्राप्य रमसे' इति यद् आताम्रा समन्ताद् रक्तवर्णा द्युतिः कान्तिर्यस्य तच्च तन्मुखं तत्तया, आविष्कृता प्रकटिता रुड्याभिस्ता हरिद्वध्व दिग्वध्वः कर्णाभरणे श्रोत्रालङ्करणे विलसन्तः शोभमानाः पल्लवचयाः किशलयसमूहास्तैराजघ्नुस्ताडयामासुः। तत् तस्मात् कारणाद् हे अरुण ! ते इयं प्रातर्दृश्यमाना तनूरुणा रक्तवर्णा आस्त इति शेषः। रूपकसंकीर्णोत्प्रेक्षालङ्कारः।

'हे धूर्त ! रात्रि को पाकर हमें घोर अन्धकार में ठेलते हुए उसके साथ रमण करते हो। मानो यह विचार कर तमतमाई कान्ति वाले मुख से कोप प्रकट कर दिशारूपी बधुओं ने अपने कर्णाभूषण के रूप में सुशोभित पल्लव-समूह से तुम्हें ताड़ना दी। इसी लिए तुम्हारा शरीर लाल दिखाई पड़ता है ॥४१॥

लसत्सिन्दूराक्तं द्विरदवदनोऽङ्गं परिदध-

ल्लुठन्नङ्के शङ्के तव भवतनोरर्क ! रमते।

तदाश्लेषादेषाप्यरुणिम-समेता समुदिता

भवन्मूर्तिः केषामिह मनसि तर्कान्न तनुते ॥४२॥

हे अर्क ! द्विरदवदनो गजाननो गणेशः सिन्दूराक्तं सिन्दूरेण चर्चितम् लसत् शोभमानम्, अङ्गं मस्तकमिति यावत्, परिदधन् धारयन् भवतनोः शिवशरीरभूतस्य तव अङ्के क्रोडे लुठन् परिवर्तनानि कुर्वन् रमते क्रीडति। तस्मादेव भवन्मूर्तिः दृश्यमाना ते तनुः तस्य-बालगजाननस्य आश्लेषात् परिरम्भात् अरुणिम्ना रागेण समेता युक्ता समुदिता उदयं प्राप्ता सती केषां जनानां मनसि चित्ते तर्कान् ऊहान् न तनुते ? नास्तृणाति ? सिन्दूराञ्चितमस्तको गजाननो भवशरीर-भूतस्य सूर्यस्य क्रोडे लुठन् क्रीडति तस्मादेव सिन्दूरसंक्रमणात् सूर्यस्य वपुः शोणम् उदेतीत्यभिप्रायः। उत्प्रेक्षालङ्कारः ॥४२॥

हे सूर्य ! सिन्दूर-लिप्त सुशोभित मस्तक धारण करने वाले गजानन, शिव शरीररूप तुम्हारी गोद में लेट-लेट कर खेलते हैं। मानो उनके आश्लेष से ही (सिन्दूर लगने से) लालवर्ण उदित हुआ तुम्हारा शरीर किन लोगों के मन में तर्क उत्पन्न नहीं करता ? ४२॥

रथं यावद् भारोहण, 'मिहिर' नारोहति भवान्
प्रकाशोऽयं तावत्तव चरणरागो विलसति ।
समन्तात्सर्वाशामुखमरुणयन्तं निजरुचा
तमेतं शङ्कन्ते किमिति कतिधा के न कवयः ॥४३॥

भानां रोहणं प्रसारो यस्मात् तत्संबुद्धौ हे भारोहण ! मिहिर ! सूर्य ! भवान् यावद् रथं नारोहति तावत् तदापर्यन्तं तव चरणरागस्ते पादयोररुणिमाऽयं प्रकाशः प्रातःकालीना रक्ता द्युतिर्विलसति शोभते। निजरुचा स्वकान्त्या समन्तात् चतुर्दिक् सर्वाशामुखं दिङ्मण्डलम् अरुणयन्तं रक्तं बिदधतम् एवं तं चरणरागं कवयः सूरयः किमिति कृत्वा कतिधा न शङ्कन्ते ? वहुधा कल्पन्त इत्यर्थः। रथारोहणात्पूर्व प्रसृता सूर्यस्य चरणयोररुणा आभा उषसि दिङ्मण्डलमरुणयन्ती कविभि र्बहुधा वितर्क्यते इति सारम् । उत्प्रेक्षालंकृतिः ॥४३॥

हे आभा के उद्गम सूर्य ! जब तक आप रथ पर सवार नहीं होते तब तक तुम्हारे चरणों का यह अरुण प्रकाश सुशोभित होता है। चारों ओर सभी दिशाओं के मुख को अपनी कान्ति से अरुण बनाते हुए इस (तुम्हारे चरणों के) प्रकाश को लेकर कवि लोग कितने प्रकार से कल्पना नहीं करते ॥४३॥

त्रिलोकीवन्द्यस्योदयचरमभूभृत्तटभुवः
कठोरायाः स्पर्शो मिहिर ! तव मा स्तादिति धिया।
दिशामीशैः कल्पद्रुमनवलसत्पल्लवचयः
समास्तीर्णो मन्ये भवदरुणिमानं प्रथयति ॥४४॥

हे मिहिर ! मन्ये त्रयाणां लोकानां समाहारस्त्रिलोकी तस्या वन्द्यस्य वन्दनीयस्य तव कठोरायाः कठिनायाः उदयचरमयोरुदया-

स्तयो र्भूभृतोरचलयोस्तटभुवः प्रान्तभूमेः स्पर्शो मा स्तात् मा भूदिति धिया इति मत्या दिशामीशैः दिक्पालैरिन्द्रादिभिः कल्पद्रुमस्य नवानां लसतां शोभमानानां पल्लावानां किसलयानां चयः समूहः समास्तीर्णः प्रसारितः सन् भवतोऽरुणिमानं रागं प्रथयति वर्द्धयतीत्युत्प्रेक्षा ।।४४।।

हे सूर्य ! प्रतीत होता है कि त्रिभुवनबन्दनीय आपका स्पर्श उदयाचल और अस्ताचल की कठोरभूमि से न हो । इस विचार से (इन्द्रादि) दिक्पालों के द्वारा बिछाया हुआ कल्पद्रुम के मनोहर नवपल्लवों का समूह आपकी लालिमा को बढ़ा रहा है ।।४४।।

सुरज्येष्ठस्यैषा रजसि निजमूर्तेर्मम तनू-
रिति ज्ञात्वा रक्तो दिवसकर ! संध्यामयमधाः ।
त्यजंस्तेन त्यक्तामिह मनसि धिक् तामिति विद-
न्नथो रागोन्मुक्तो विहितपरियुक्तो विजयसे ।।४५।।

हे दिवसकर ! एषा मम तनूः बिम्बरूपं वपुः रजसि रजोगुणो सुरज्येष्ठस्य महेशस्य निजमूर्तेरेव (विवर्तः) इति ज्ञात्वा रक्तो रागभृतः अयं त्वं संध्यामधाः संध्यां धृतवान् । तेन त्यक्तां शिवेनोत्सृष्टां तां संध्यां मनसि चित्ते ताम् धिक् 'सा शोच्या' इति विदन् अवगच्छन् त्यजन् एवं च रागेण अरुणिम्ना कामानुरागेण च उन्मुक्तो रहितः विहितपरियुक्तः विहितम् कृतं परितः सर्वतः युक्तम् उचितं येन तथाभूतस्त्वं रागेण रहितो भूत्वा विजयसे ।।४५।।

हे सूर्य ! 'यह मेरा शरीर महादेव की अपनी मूर्ति का ही है। यह जानकर मानो अनुरक्त होकर तुमने संध्या को अपनाया । किन्तु महेश द्वारा त्यागी हुई उसे मनमें यह सोचते हुए कि 'यह धिक्कार योग्य है, त्यागते हुए रागोन्मुक्त होकर सर्वथा उचित करने वाले तुम्हारी जय हो ।।४५।।

अये राजीवानामुषसि खलु जीवातुलहरी-
मयं रागं बिभ्रद् यमिह जगतीमेष दयते ।

स एवायं प्रातः प्रभवति समुच्छ्वासमयते
प्रभाभावं चैषु प्रतिदिवसमन्तः कलयति ॥४६॥

अये ! उषसि उषःकाले राजीवानां कमलानां जीवातुलहरीमयं जीवनदायितरङ्गमयं रागम् अरुणिमानं प्रणयं च विभ्रत् धारयन् एव सूर्यो जगतीं संसारं दयते प्रणयतीति यावत् । स एव रागः प्रातः प्रभवति प्रातःकाले जाते समुच्छ्वासमयते वृद्धिं मच्छति एषु कमलसमूहेषु च प्रकर्षेण भातीति प्रभा शोभा तस्या भावं सत्तामन्तः कलयति तदन्तर्निदधाति । उषःकाले यं कमलजीवनदायकम् अरुणिमानमनुरागमिव विभ्रत् सूर्यं उदेति स एव रागस्तदनु प्रातर्गाढोभवन् कमलेषु शोभां निदधातीति भावः ।

अहो ! उषाकाल में कमलों के लिए जीवनदायी तरङ्गस्वरूप जिस राग को लिए हुए सूर्य संसार पर कृपा करता है वही राग प्रातःकाल परिपक्व हो जाने पर प्रतिदिन ही कमलों के अन्तस् में शोभा का समावेश किया करता है ॥४६॥

अधिप्राचि प्रातः प्रथमसुदयस्त्वं मघवतो
नतात् सायं प्रत्यग्घरिति वरुणादात्मवशगात्
अवाप्तो रत्नानामनिशमभिषेकं दिनमणे ।
विजानोमः शोणो द्वितयसुरकोणोदितवपुः ॥४७॥

हे दिनमणे ! प्रातः अधिप्राचि प्राच्यां दिशि उदयंस्त्वं प्रथमं प्राक्, नतात् प्रणामं कुर्वतो मघवत इन्द्रात् सायं प्रत्यग्घरिति पश्चिम दिशायाम् आत्मवशगात् स्ववश्यात् वरुणात् रत्नानामभिषेकमवाप्तः प्राप्तः, द्वाववयवावस्येति द्वितयं द्वितये सुरकोणे पूर्वदिग्भागे पश्चिमे च उदितं उद्गतं वपुर्यस्य स त्वं शोण इति विजानोमः वयं विद्मः । उषसि पूर्वस्यां दिशि महेन्द्रात् सायं पश्चिमायां च वरुणात् रत्नाभिषेकं प्राप्य सूर्यो रक्तवर्णो दृश्यत इति भावः । उत्प्रेक्षालंकारः ।४७।

हे दिनमणे ! मालूम पड़ता है कि प्रातःकाल उदय होते हुए, पहले पूर्व दिशा में नतमस्तक इन्द्र से, और फिर सायंकाल में पश्चिम दिशा में स्ववशीभूत वरुण से, निरन्तर रत्नाभिषेक प्राप्त करके

उक्त दोनों देवताओं की दिशाओं में उद्गत शरीर वाले तुम लाल दिखाई पड़ते हो।

निजे बिम्बे बिभ्रल्लसदरुणिमानं करुणया

फलं बिम्बं कान्ताधरमपि च बिम्बं दिनमणे !

सनाथीकुर्वाणः किमु जयसि नो चेदरुणता

कुतस्तेषामेषामभिभवति शोणोत्तरमियम् ।।४८।।

हे दिनमणे ! निजे बिम्बे स्वीये मण्डके लसन्तं शोभमानम् अरुणिमानं बिभ्रत् धरन् करुणया कृपया च बिम्बनामकं फलं कान्ताधरबिम्बं च सनाथीकुर्वाणो जयति किमु ! नो चेद् अन्यथा तेषां बिम्बफलादीनामियम् दृश्यमाना अरुणता शोणोत्तरं शोणातिशयमन्यत् किमपि कुतः कस्मात् कारणादभिभवति तिरस्करोति ? स्वबिम्बे वर्तमानमरुणिमानं सूर्यः करुणया बिम्बफलेषु कान्ताधरबिम्बेष्वपि च संचारयति अन्यथा तदितरशोणातिशयपदार्थानभिभूय कथमेते वर्तन्त इति भावः ।।४८।।

हे सूर्य ! अपने बिम्ब में सुखद अरुणिमा को धारण करते हुए तुम करुणावश बिम्बफल और सुन्दरियों के अधरबिम्ब को भी (नामसादृश्य से ही सुगन्ध मानकर) अरुणिमा से सनाथ करते हुए सुशोभित हो अन्यथा (अन्य वस्तुओं की) अतिशय लालिमा को अभिभूत करने वाली इनकी लालिमा कहाँ से आयी ? ४८ ।।

फलान्योष्ठाबिम्बान्यपि तपन ! बिम्बस्य भवतो

विजानीमः सेवातिशयमिह भक्त्या विदधरे।

यतस्तेभ्यो भासो ध्रुवमभिधप्याशु करुणो

ददानः सारूप्यादुदयगिरिमौलौ विलसति ।।४९।।

हे तपन ! सूर्य ! इह लोके फलानि बिम्बफलानि अपि अधरपुटानि च भवतस्ते बिम्बस्य मण्डलस्य भक्त्या श्रद्धया सेवातिशयं सेवाधिक्यं विदधिरे अकुर्वन्निति विजानीमो विद्मः। यत आशुकरुणः

सत्वरं करुणया द्रवणशीलस्तव बिम्बः अभिधया नाम्ना सारूप्यात् समानरूपतायाः कारणात् तेभ्यो भासो कान्तीर्ददानो यच्छन् उदयगिरिमौलौ उदयाचलस्य शृङ्गे विलसति शोभते। उदयाचलस्थितं सूर्यबिम्बं बिम्बफलैरधरबिम्बैश्चात्यर्थं सेवितं तेभ्यो भासः प्रदाय शोभत इतिभावः। उत्प्रेक्षालङ्कारः।:४६॥

हे सूर्य ! जान पड़ता है कि बिम्बफलों और ओष्ट बिम्बों ने भक्तिपूर्वक तुम्हारे बिम्ब की अत्यन्त सेवा की थी क्यों कि तुम्हारा आशुदयालु बिम्ब नाम तथा रूप के सादृश्य के कारण उन्हें भी आभा प्रदान करता हुआ सुशोभित होता है ॥४६॥

अखण्डब्रह्माण्डस्फुरदरुणभासां दिनपते !
तवांशूनां कल्पे क इव महिमानं निगदतु।
यदापातादाताम्रितमधरमवलोक्य सुदती
सपत्न्याः प्रेयांसं रतमपि रते श्लिष्यति रसात् ॥५०॥

हे दिनपते ! अखण्डेऽखिले ब्रह्माण्डे जगत्यां स्फुरन्त्योऽरुणा रक्तवर्णा भासः कान्तयो येषां तेषां तवाँशूनां तव किरणानां क इव को जनो महिमानं माहात्म्यं निगदतु कथयतु इति अहं कल्पे कल्पनां करोमि। विचारयन्नपि कमपि तद्वर्णने क्षमं नैवेक्ष इति काक्वा आक्षिप्यते। येषामंशूनामापातात् समन्तात् पतनात् सपत्न्याः अधरमाताम्रं गाढं रक्तवर्णं विलोक्य सुदती सुन्दरी प्रिया रते रतिक्रीडायां रतमपि कृतरतिमपि प्रेयांसं पतिं रसादाश्लिष्यति। सूर्यारुणिम्नाऽपि सपत्न्या अधरं गाढदष्टमिव ताम्रमालोक्य स्वप्रेमावेगेन प्रेयांसं वशीकर्तुं कामा कान्ता तस्यै अनीर्ष्यन्ती कान्तं समापितरतिमपि रसाद् गाढं परिरम्भते इत्यभिप्रायः ॥५०॥

हे दिनपते ! सोचता हूँ कि अखण्ड ब्रह्माण्ड में अरुण आभा फैलाने वाली तुम्हारी किरणों की महिमा का बखान कौन कर सकता है ? जिनके पड़ने से सपत्नी के अधर को देखकर प्रियतमा समापित-रति प्रियतम को रतिक्रीडा के समय रसातिरेक से आबङ्गिन में बाँध लेती है ॥५०॥

अये ! मेरुप्रान्तभ्रमिरसिक ! भागद्वयगता-
निमान् पद्मान् बन्धून प्रवससि परिष्वज्य नियतम् ।
ततो लग्नान्मन्ये मिहिर ! तव तेषां मधुभरात्
सदा सायं प्रातर्विलसति समन्तादरुणिमा ॥५१॥

अये ! मेरोः प्रान्तयोः परावरपार्श्वयोः भ्रमीणां भ्रमणानां रसिक ! कामुक ! (यतः) भागद्वयगतान् पूर्वपश्चिमभागयोः स्थितान् बन्धून् सरोजमित्राणि नियतमवश्यं परिष्वज्य आलिङ्ग्य प्रवससि प्रवासं यासि । ततस्तस्मात् कारणाल् लग्नाद् वपुषि संपृक्तात् तेषां मधुभरात् मकरन्दस्य आधिक्यात् सदा सर्वदा सायं प्रातः समन्तात् चतुर्दिक् तवारुणिमा शोणिमा विलसति राजते । पद्मशब्दस्य पुंल्लिगत्वं कवेर्निरंकुशत्वात् । उत्प्रेक्षालंकारः ॥५१॥

अरे मेरु पर्वत के आस-पास घूमने के रसिक सूर्य ! मेरु के पूर्व पश्चिम दोनों ओर के भागों में स्थित इन कमलरूपी बन्धुओं को हृदय से लगाकर ही विदा हुआ करते हो । मालूम होता है उसी से अत्यधिक मकरन्द के लग जाने के कारण सदा ही सुबह-शाम हर ओर तुम्हारी लालिमा विलास किया करती है ।

सहस्रै रुस्रै स्त्वं जलजकुलबन्धो ! प्रतिदिनम्,
सुधां सिन्धोर्धत्से जलजपुनरुज्जीवनकृते
श्रमादस्मान्मन्ये मिहिर ! तव मूर्तावरुणिमा
रसस्तस्यास्तेषु स्फुरति च मरंदस्य मिषतः ॥५२॥

हे जलजकुलबन्धो ! त्वं सहस्रै रुस्रैः किरणैः प्रतिदिनं जलजानां कमलानामुज्जीवनस्य कृते कमलानि जीवयितुं सिन्धोः सागरात् सुधां पीयूषं धत्से गृह्णासि । मन्ये अस्मात् श्रमात् श्रान्तेः कारणात्तव मूर्तौ वपुषि अरुणिमाऽस्ति तस्या सुधाया स्तव मूर्तेर्वा रसश्च मरन्दस्य मधुनो मिषतो व्याजात् तेषु कमलेषु स्फुरति विसरति । उत्प्रेक्षालंकारः।

हे कमलों के बन्धु सूर्य ! तुम प्रतिदिन अपनी सहस्र रश्मियों से कमलों के पुनरुज्जीवन-हेतु सिन्धु से सुधा ग्रहण करते हो । जान

पड़ता है उसी परिश्रम के कारण तुम्हारी मूर्ति में लालिमा है और उन कमलों में मकरन्द के बहाने सुधा अथवा तुम्हारी मूर्तिका रस स्फुरित होता है ।

महः शके पंकेरुह-निकरभासे तव मनाग्

अनायासं सिन्धोः श्रियमुषसि नित्यं विदधतः ।

तदाभालाभाप्तादरुणिमभरादेतदरुणम्

जनानां द्राङ् नानाविधबहलसूक्तीर्जनयति ५३॥

पङ्केरुहाणां कमलानां निकराणां भासो यत्र तत्रोषसि उषः काले ऽनायासं प्रयासं विनैव नित्यं सदा मनाक् सिन्धोः सागरस्य श्रियं विदधतः कुर्वाणस्य तव ते महस्तेजस्तेषां कमलानामाभालाभात् कान्ति-प्राप्ति-हेतो रुरुणिमभराद् रागाधिक्याद् अरुणं सत् द्राक् सत्वरं जनानां लोकानां नानाविधा विविधप्रकारका बहला अर्थगर्भाः सूक्ती र्वचनानि जनयति उत्पादयति ।

कमल समूह की कान्ति से भासित उषः काल में संसार की शोभा उत्पन्न करने वाले, तुम्हारा तेज मानो कमलों की आभा मिलने से अरुणिमा बढ़ जाने के कारण लोगों की अनेक प्रकार की उक्तियों को जन्म देता है ॥५३॥

तवारुण्यं भण्यं कथमिव दिनादौ दिनपते !

कवीनां यच्चान्ते तमसि गजभावं दृढयति ।

यतो धत्ते स्वस्मिन् कलहकुपितैतत्करशिरोऽ

भिषङ्गोत्संक्राम्यन्मदसलिलसिंदूरभरताम् ॥५४॥

हे दिनपते ! दिनादौ प्रातःकाले तव यत् आरुण्यं रक्तत्वं तत् कथं केन प्रकारेण भण्यं कथनीयम् यच्च अन्ते अन्ततो गत्वा कवीनां तमसि अन्धकारविषये गजभावं दृढयति गजमेनं ते मन्यन्त इति यावत् । यतस्तद् आरुण्यं स्वस्मिन् कलहेन कुपितस्य क्रुद्धस्य एतस्य हस्तिनः करे शुण्डायां शिरसि च यद् आक्रमणे संसर्गः तेन संक्राम्यन्तीं संसरन्तीं मदसलिलस्य सिन्दूरस्य च भरतामाधिक्यं धत्ते दधाति ।

रूपकोत्प्रेक्षयोः सङ्करः। तमो गजः सूर्यश्च सिंहः, तयोः कलहे तमो-गजस्य करशिरसः संपर्कात् संक्रान्तं सिन्दूरमेव सूर्यारुण्यस्य कारण-मिति फलितार्थः।

हे सूर्य ! तुम्हारी प्रातःकालीन अरुणिमा का वर्णन कैसे किया जा सकता है जो अन्त में कवियों के हृदय में अन्धकार को हाथी समझ लेने की बात को पुष्ट करता है क्योंकि वह (आरुण्य) अपने मन में कलह में कुपित (तमोरूप) इस हाथी के सूंड और सिर पर आक्रमण करने के कारण संक्रान्त मदजल और सिन्दूर की अधिकता को धारण करता है ।।५४।।

अये प्रातः सन्ध्यासमयविलसद्राजसतनो !
जनोदञ्चद्रागालय ! जलनिधेरुद्गतिवशात् ।
तवार्द्रे बिम्बेऽस्मिन्नुदयगिरिजाद् धातुनिचयाद्
उपक्रान्तस्तर्कान् जनयति कवीनामरुणिमा ।।५५।।

अये इति सम्बुद्धौ प्रातः सन्ध्यासमये च विलसन्ती शोभमाना राजसी रजोगुणप्रधाना तनूर्मूर्तिर्यस्य तथाभूत ! जनस्य लोकस्यो-दञ्चतो वर्धमानस्य रागस्यानुरागस्य आलय ! जलनिधेः समुद्राद् उद्गते निष्क्रमणस्य वशात् कारणात् तव भवतः अस्मिन् दृश्यमाने आर्द्रे क्लिन्ने बिम्बे मण्डले उदयगिरिजाद् उदयाचले उत्पन्नाद् धातुनिचयात् गैरिकादिधातुसमूहाद् उपक्रान्तः संक्रान्तोऽरुणिमा रागः कवीनां तर्कान् कल्पनाः जनयति। सूर्यो हि सायम् अस्ताचलात् समुद्रे पतति प्रातश्चोदयगिरौ तस्मान्निष्क्रम्याविर्भवतीति पौराणी वार्ता ।।५५।।

हे प्रातः तथा संध्या में राजस शरीर से शोभित ! लोगों के बढ़ते हुए राग के निलय सूर्य ! जलनिधि से निकलने के कारण तुम्हारे गीले शरीर पर लगे उदयगिरि पर उत्पन्न होने वाले धातु समूह से संक्रान्त हुई लालिमा कवियों की (अनेक) कल्पनाओं को जन्म देती है ।।५५।।

त्वदुत्फालादब्धेरुदयगिरिमौलावनुदिनं
मणीनामुद्योतो विलसतितरां यो दिनमणे !

तमेवं जानन्ती परिष्वजनरागं परदिशो

रुषेवाभूत् प्राचीहरिणनयना किञ्चिदरुणा ॥५६॥

हे दिनमणे ! अनुदिनं प्रतिदिनम् अब्धेः समुद्रात् उदयगिरिमौलौ उदयाचलश्रृङ्गे उत्फालात् उत्प्लुताद् यो मणीनां रत्नानामुद्योतो कान्तिर्विलसतितरामतिशयेन शोभते तमेव रत्न-प्रकाशं परदिशः (प्रतिनायिकायाः) परिष्वजनरागम् आलिङ्गनजनितमरुणिमानं जानन्ती मन्यमाना प्राचीहरिणनयमा प्राची सुन्दरी रुषेव क्रुधेव किञ्चिदरुणा किमपि ताम्रवर्णा अभूत् । उत्प्रेक्षालङ्कारः । परिष्वजनेत्यत्रच्छन्दोभङ्गः ॥५६॥

हे सूर्य ! प्रतिदिन समुद्र से उदयाचल के शृङ्ग पर तुम्हारे छलाँग लगाने से जो मणियों की आभा अत्यधिक सुशोभित होती है उसे पश्चिम दिशा के आलिङ्गन से जनित लालिमा मानकर पूर्वदिशा रूपी मृगाक्षी मानो क्रोध से लाल हो उठती है । ५६॥

दिनं प्रत्यब्धेर्यन्नयति बडवाग्निं दिनपते !

तपन्तं तं बद्ध्वा सदय ! पुनरेनं त्यजसि यत् ।

अतः शोणा शोणा तदमलशिखाभिर्वलयिता

प्रभाते मा ते श्रीनिलय ! सुतरां भात्युदयिनी ॥५७॥

हे दिनपते ! यत् प्रतिदिनं वडवाग्निम् बद्ध्वा अब्धेः सागरान्नयसि तपन्तं च दृष्टा दुःखिनं चावलोक्य । हे सदयः ! दयालो ! पुनरेनमग्निं यत्त्यजसि । हे श्रीनिलय ! अतोऽस्मात्कारणात प्रभाते प्रातः काले तस्याग्नेरमलाभिर्निर्मलाभिःशिखाभिर्ज्वालाभि र्वलयिता युक्ता शोणा-शोणा ते उदयिनी उदयकालीना रक्तवर्णा भा कान्तिः सुतरां नितरां भाति शोभते ॥५७॥

हे दिनपते, हे श्रीनिलय, लक्ष्मीनिकेतन ! प्रतिदिन वडवाग्नि को बाँधकर समुद्र से ले जाते हो और फिर हे सदय ! तपते हुए देखकर छोड़ देते हो । इसलिए उसकी निर्मल ज्वालाओं से लिपटी हुई तुम्हारी उदयकालीन लाल-लाल छवि अत्यधिक सुशोभित होती है ॥५७॥

प्राचीभालेन्दुसिन्दूर-सीमन्त-तिलकद्युति।
उदितैककरं पायात् प्रातर्मार्तण्डमण्डलम् ॥५८॥

प्राच्या दिशो नायिकाया इव भाले मस्तके इन्दौ चन्द्रे इव सिन्दूरस्य सीमन्ते केशवेषे तिलकमिव द्युतिः कान्ति र्यस्य तत्, उदितो निर्गत एकः केवलः करोऽशुर्यस्य तन्मार्तण्डस्य सूर्यस्य मण्डलं पायात् रक्षेत्। उपमारूपकयोः संकरोऽनुष्टुप् छन्दः ॥५८॥

पूर्वदिशा के चन्द्रमा जैसे मस्तक पर सिन्दूर के तिलक के समान कान्तिमान् सूर्यमण्डल जिसकी केवल एक किरण उदित हुई हो, रक्षा करे।

नमस्ते मार्तण्ड ! द्युतिनिलय ! ते चण्डमहसे
नमोऽस्त्वादित्याय प्रकटबपुषे खण्डपरशोः।
नमः पद्माकान्त-प्रियवसतये पद्मपटली-
प्रकाशायास्तां ते दिवसकर ! कस्मैचन नमः ॥५९॥

हे मार्तण्ड ! द्युतीनां कान्तीनां निलय ! आलय ! चण्डं तिग्मं महस्तेजो यस्य तस्यै नमः। खण्डपरशोः शिवस्य प्रकटवपुषे व्यक्त मूर्तये नमः। पद्माकान्तस्य विष्णोः प्रियवसतये प्रियाय निवासाय पद्मानां कमलानां पटल्य मण्डलयाः प्रकाशाय विकासकर्त्रे कस्मैचन ते नमः ॥५९॥

हे मार्तण्ड ! कान्ति के निलय ! तीक्ष्ण किरणों वाले ! आपको नमस्कार ! शिव के व्यक्त शरीर आदित्य को नमस्कार। हे दिनकर ! लक्ष्मी के प्रिय निवास ! तथा पद्म-पटल को खिलाने वाले ! आपको नमस्कार ॥५९॥

नमो मार्तण्डायारुणकिरणपूष्णे तरणये।
नमोऽर्यम्णे प्रद्योतन ! तपन ! ते भास्कर ! नमः।
नमो ब्रध्नायार्क ! त्रिगुणमय ! तेऽहस्कर ! नमः
नमः सप्ताश्वायोल्लसतु सततं शंकर ! नमः ॥ ६०

ब्रघ्नः सूर्यः, शंकर ! कल्याणकर ! शेषं स्पष्टम् ॥६०॥

परदेशनिवृत्त-यत्प्रियाप्तारुण-शाटीभिरुपस्कृता इवैताः ।

अरुणा हरितो विभान्ति यस्मिन्नुदिते स्तात् स हि सुखप्रदो नः ।६१।

यस्मिन्नुदिते परदेशात् प्रवासान्निवृत्तात् प्रत्यागतात् यस्मात् प्रियात् आप्ताभिः उपहृताभिः शाटीभिरुपस्कृता प्रसाधिता इव एता अरुणा रक्ता हरितो दिशो विभान्ति शोभन्ते स हरिः सूर्यो नोऽस्माकं सुखप्रदः सुखदाता स्तात् भवतु ॥६०॥ उपमोत्प्रेक्षालङ्कारः ॥

जिसके उदित होने पर दिशाएँ मानो परदेश से लौटे हुए प्रिय द्वारा उपहृत लाल साड़ियों से सजी हुई सुशोभित होती हैं, वह सूर्य हमारे लिए सुखप्रद हो ॥६१॥

अये शोणः शोणो यदुषसि भवस्यम्बरमणे !

परिज्ञातं तत्त्वं तदिह ननु सूक्ष्मं विमृशता ।

समन्तादासायं दिशि दिशि यथेच्छं प्रणटतो

लसत्यग्रे दीप्तारुणपटमयीयं जवनिका ॥६२॥

हे अम्बरमणे ! गगनरत्न ! यद् यस्मात् कारणात् उषसि उषःकाले शोणः शोणो, वीप्सायां द्वित्वं रक्तवर्ण इत्यर्थः, भवसि जायसे तदिह सूक्ष्मं सावधानं यथा स्यात्तथा विमृशता विचारयता तत्त्व मर्मं परिज्ञातं सम्यगवबुद्धम् । आसायं सायंपर्यन्तं समन्तात् सर्वत्र दिशि दिशि प्रतिदिशं यथेच्छम् इच्छानुसारं प्रणटतोऽभिनयं कुर्वतस्तेऽग्रे समक्षम् इयं दीप्तेन अरुणेन रक्तवर्णेन पटेन वस्त्रेण निर्मिता जवनिका लसति शोभते । उत्प्रेक्षालङ्कारः ॥६२॥

हे आकाश रत्न ! उषाकाल में जो तुम लाल-लाल हो जाते हो गम्भीर चिन्तन करते हुए उसका मर्म (मैंने) जान लिया । प्रत्येक दिशा में सर्वत्र स्वेच्छानुसार नृत्याभिनय करने वाले तुम्हारे सामने मानो यह चमकीले लाल कपड़े से बनी हुई जवनिका सुशोभित है ।६२।

किं जन्यमारुण्यममुष्य क्षणेऽर्क ! त्वयीति लोकस्य मुधा वितर्कः ।

यद्वारुणीभोगकृदत्र दृष्टः सर्वोऽपि शोणः प्रकटेदपृष्टः ॥६३॥

हे अर्क ! त्वयि भवति उषःक्षणे प्रत्यूषकाले आरुण्यं रक्तत्वं किंजन्यं कस्माज्जातम् ? इति लोकस्य वितर्को विचारो मुधा व्यर्थं एव। यत् यतो वारुणी वरुणरक्षिता पश्चिम दिक् सुरा च, तस्या भोगकृदुपभोक्ताऽत्र सर्वोऽपि रक्तवर्णो दृष्ट इति अपृष्टः शोणः प्रकटेत् ॥६३।

हे सूर्य ! उषाकाल में तुम्हारी लालिमा किस कारण से है ? लोगों का यह वितर्क व्यर्थ ही है; क्योंकि यह तो बिना पूछे ही स्पष्ट है कि वारुणी (शराब) का उपभोग करने वाले सब कोई लाल हो जाता है। [तुम भी तो वारुणी—पश्चिम दिशा का उपभोग करते हो।]

यदेतच्छोणत्वं दिवसकर ! तत्त्वं तदिह ते।
हरेर्ध्वान्तोन्माद्यद् - द्विपकुलममन्दं दलयतः।
निशान्ते शान्तेऽब्जे करनखरघातोच्छलदसृक्-
छटासङ्गादङ्गच्छुरितमुषसि स्फूर्जतितराम् ॥६४॥

हे दिवसकर ! सूर्य ! यत्ते निशान्ते रात्रिविगमे ऽब्जे शान्ते कमले प्रीते सति उषसि प्रत्यूषे एतत् शोणत्वम् अरुणत्वं तद् ध्वान्तानां तमसामुन्माद्यद् मत्तं भवद् द्विपकुलं गजयूथम् अमन्दं सत्वरं दलयतो मारयतस्ते हरेः सूर्यरूपस्य सिंहस्य तत्त्वं तादृशत्वं अरुणत्वमित्यथः, करनखराणां किरणरूपनखानां पक्षे करयोरग्रचरणयोर्नखराणामाघा-तेनोच्छलन्त्या असृजो रुधिरस्य च्छटासङ्गाद् व्यापनप्रसङ्गाच्च अङ्गा-पनांच्छुरित लेपः स्फूर्जतितरां बाभाति ॥ रूपकोत्प्रेक्षयोः सकरः ॥ ६४

हे सूय ! रात्रि की समाप्ति पर कमलों के शान्त रहते उषाकाल में जो तुम्हारो लालिमा है वह अन्धकाररूपी मत्त हस्ति-समूह का प्रबल दलन करते हुए तुम्हारे किरणरूपी नाखूनों के आघात से उछलते हुए खून के छींटे पड़ने से अङ्गों के सन जाने के कारण प्रतीत होती है ॥६४॥

मुधैवारुण्येऽस्मिस्तव-तपन ! संशीतिरभवद्
इदानीं-निर्धारोऽजनि मम विचारोऽथ मनसः।

प्रतिप्रत्यूषं यज्जनयति भवन्तं स्वजठरा-
दियं प्राची नूनं तदयमिह गर्भादरुणिमा ॥६५॥

हे तपन ! तव आरुण्ये रागे मुधैव व्यर्थमेव संशीतिः संशयोऽभवत्। अथ इदानीमधुना मे मन मनसो हृदयस्य विचारो निर्धारो निश्चितोऽजनि जातः। यत् प्रतिप्रत्यूषं प्रतिदिनमुषसि इयं प्राची पूर्वदिशा भवन्तं त्वां स्वजठरात् स्वगर्भाज्जनयति प्रसूते नूनं ध्रुवम् अयम् अरुणिमा रागोः गर्भात् गर्भस्य कारणाद् अस्तीति शेषः। उत्प्रेक्षालङ्कारः॥

हे तपन ! तुम्हारी ललाई के विषय में व्यर्थ ही सन्देह हो गया, और अब मेरे मन में यह विचार निर्धारित हो गया है कि क्योंकि प्रत्येक प्रातः यह प्राची दिशा तुम्हें अपने गर्भ से उत्पन्न करती है, अवश्य ही यह अरुणिमा गर्भ के कारण है।

समन्ताद् यो रक्तः परसदनमायात् स भवती-
त्यशेषाणां प्रेयान्नयन-हृदयानन्दजननः
इतीवारक्तः संविशसि तरणे ! त्वं मघवती
दिशं काले सायं वरुणाहरितं चातिचतुरः ॥६६॥

हे तरणे ! यः समन्तात् पूर्णतया रक्तोऽनुरागभरः परस्यान्यस्य सदनं गृहमायात् स अशेषाणां सर्वेषां नयनयोर्नेत्रयोर्हृदयस्य मनसश्चानन्दजनन आनन्ददायी प्रेयान् अतिशयेन प्रियो भवति जायते इतीव इत्थंविचार्येव त्वम् अतिचतुर व्यवहारेऽतिनिपुणः (उषसि) आरक्तः समान्ताद् रक्तः सन् मघवत इन्द्रस्य दिश सायंकाले च वरुणहरितं वरुणदिशम् संविशति प्रविशति। उत्प्रेक्षालङ्कारः ॥६६॥

हे सूर्य जो किसी अन्य के घर पूरी तरह अनुराग के साथ जाता है। नयन और हृदय को आनन्दित करने वाला वह व्यक्ति सबका अतिप्रिय हो जाता है। भानो ! यही विचारकर अत्यन्त व्यवहार-कुशल तुम पूरी तरह राग (प्रेम और लालिमा) से भरे हुए इन्द्र की

दिशा (पूर्व) में प्रविष्ट होते हो और सायंकाल वरुण की दिशा (पश्चिम) में ।।६६।।

प्रति प्रत्यूषं भोस्तपन ! भवतः शोणवपुषो

रहस्यं नो विद्मः कथमपि धिया यद्यपि वयम्

तथाप्येतद्विद्मस्तव सहजतेजः-कलनयो-

दयाद्रे रत्नौघः स्फुरति यदतोऽसावरुणिमा ।।६७।।

भोस्तपन हे सूर्य ! वयं प्रति प्रत्यूषं भवतस्तव शोणवपुषः रक्त-शरीरस्य रहस्यं धिया बुद्धया कथमपि केनापि प्रकारेण न विद्मः तथापि एतद् विद्मो जानीमो यत् तव सहजस्य स्वभावजस्य तेजसो महसः कलनया संयोगेन उदयाद्रे रुदयाचलस्य रत्नौघो रत्न-राशिः स्फुरति चकास्ति अतोऽस्मात्कारणाद् असौ अरुणिमा रागो जायत इत्यर्थः ।।६७।।

हे सूय ! प्रत्येक प्रातः तुम्हारे रक्त शरीर का रहस्य बुद्धि से हम किसी भी प्रकार नहीं समझ पाते, फिर भी यह जानते हैं कि तुम्हारे सहज तेज के संयोग से उदयाचल की रत्नराशि चमचमा उठती है इसीलिए यह अरुणिमा है ।।६७।।

प्रतप्तस्वर्णाभं दिवसवदने पीतवसनं

वसानो रत्नालीजटितमिह भानो ! स्फुरसि यत् ।

तदेतस्मात्तं ण्डारूणमिह भवन्मण्डलमिदं

कवीनां नोऽखण्ड निजविपुलरागं विसृजतु ।।६८।।

हे भानो ! सूर्य ! यद् यतः, इह दिवसवदने प्रातःकाले रत्नावली जटितं मणिमालाखचितं प्रतप्तं ऽ स्वर्णाभं तप्तसुवर्णवर्णं पीतवसनं पीतवस्त्रं वसानो धारयन् स्फुरसि भ्राजसे । तत् तस्माद् एतद् इदम् अरूणं रक्तं भवन्मण्डलं तव बिम्बं नोऽस्माकं कवीनामखण्डं संपूर्णं निजविपुलरागं स्वाधिकं स्नेहं लालिमानं च विसृजतु वितरतु ।।६८।।

हे सूर्य ! तुम जो प्रातःकाल रत्न जड़े नये होने के समान पीत-वसन धारण किये हुए चमकते हो तुम्हारा वह अरुण मण्डल हम कवियों को अपना अखण्ड विपुल राग प्रदान करें।

पयोधौ पल्यङ्के परपुरुष ! शङ्के प्रतिनिशं
परिस्फूर्जत्कल्पद्रुमनवलसत्पल्लवमये।
नवां रम्भामाप्य स्वपिषि विहरंस्तेन विलस-
न्नयं देहे रागो जगति सुमहागो निगदति ॥६९।

हे परपुरुष ! परमपुरष ! (उपपते।) प्रतिनिशं प्रतिरात्र परि-स्फूर्जतां भासमानानां कल्पद्रुमस्य नूतनां नूलानां लसतां शोभमानानां पल्लवानां विकारे तैर्निर्मित इत्यर्थः पल्यङ्के तल्पे पयोधौ समुद्रे नवां रम्भां नवयुवतिं रम्भाख्यां देवाङ्गनां प्राप्य विहरन् क्रीडन् स्वपिषि शेषे। तेन तव देहे विलसन् भ्राजन् अयं रागोऽरुणिमा सुमहागो महान्तमपराधं निगदति कथयति। परस्त्रीगमनपातक ते प्रथयतीति भावः॥ उत्प्रेक्षालङ्कार. ॥६९॥

हे परपुरुष (परम पुरुष उपपतेः) हर एक रात में तुम चमकदार कल्पवृक्ष के नव पल्लवों से निर्मित बिस्तर पर समुद्र में नवीन रम्भा को पाकर विहार करते हुए सोते हो। इसलिए तुम्हारे शरीर पर विलसित यह अरुणिमा संसार में (उक्त महापातक) का बखान करती है ॥६९॥

पराशां संभुज्य प्रतिदिनमये रक्तहृदय-
स्त्रपाहीनः प्रातर्मम भवनमायासि विट ! रे !
इति प्राचीवध्वा इव कृतरुषोऽलक्तकरसो-
ल्लसत्पादाघातादरुणतनुराभाति तरणिः ॥७०॥

रे विट ! प्रतिदिनं पराशां पश्चिमदिशं (अन्यस्याशाभूतां प्रेयसीं च) संभुज्य संरम्य रक्तहृदयो रक्तं पराशाया लग्नलाक्षाद्यङ्गरागव शादरुणं हृदयं वक्षो यस्य तथाभूतस्त्वं धृतपरनारीभोगचिन्ह

त्वान्त्रपाहीनो निर्लज्जः प्रातः प्रत्यूषे मम भवनमायासि इति कृता रुड् यया तस्याः कृतरुषः क्रुद्धायाः, प्राचीवध्वा अलक्तरसेन लाक्षाद्रवेणोल्लसतः शोभमानस्य पादस्य चरणस्य आघातात् ताडनात् तरणिः सूर्यः, अरुणतनूः रक्तशरीर आभाति प्रतीयते। पश्चिमदिशमुपपत्नीमुपभुज्य प्रातरायातं सूर्यं प्राचीवधूर्लाक्षासिक्तेन चरणेन ताडयति तेन संक्रान्तेन लाक्षारसेन रक्तः सूर्योऽरुणो जात इत्यभिप्रायः। उत्प्रेक्षालङ्कारः।

रे विट ! प्रतिदिन परकीया (पश्चिम) दिशा(नायिका) का उपभोग करके प्रातःकाल निर्लज्जता के साथ रंगे हुए हृदय (वक्ष) से मेरे घर आते हो ?' मानो यह कहकर क्रुद्ध प्राचीवधू द्वारा लाक्षारस से शोभित चरण से प्रहार करने के कारण (लाक्षा द्रव लग जाने से) सूर्य अरुण शरीर प्रतीत होता है।

गुणातीतं ज्योतिः किमपि जगदम्बाभिधमहो
स्वबिम्बप्रस्फूर्जद्दिनमनु भवान् ज्ञापयति यत्।
तदीयाभिश्छायासरणिभिरतः शोणमभितो
विधेरण्डं कुर्वन्नुषसि किल मार्तण्ड ! वलसे ॥७१॥

हे मार्तण्ड ! भवान् दिनमनु प्रतिदिनं स्वबिम्बे प्रस्फूर्जत् स्वमण्डले भासमानं गुणातीतं सत्त्वादिगुणरहितं किमपि निर्वचनीयं जगदम्बामिधं ज्योतिः तदीयाभि ज्योतिर्विषयिणीभिः छायासरणिभिः कान्तिपथैः(संसरन्)ज्ञापयसि प्रकाशयसि। अतः उषसि अभित परितो विधेरण्डं ब्रह्माण्डं शोणं कुर्वन् रक्तं विदधत् वलसे परिवर्तसे। उत्प्रेक्षालंकारः।

हे मार्तण्ड ! क्योंकि अपने बिम्ब में भासमान जगदम्बानामक निर्गुण निर्वचनीय ज्योति को तुम प्रतिदिन प्रकाशित करते हो। अतः उषःकाल में उसकी कान्ति के प्रसार से ब्रह्माण्ड को लाल रंगते हुए चलते हो।

तिरः पश्यन् पाश्र्वोद्गतदिशमवन्तं पशुपतिं
निजां मूर्ति प्रातर्वलितगलमुद्यन् दिनमणे !
विलोलद्रत्नाली-खचितविलसत्कुण्डलरुचा-
रुणोद्योतानेतान् किरणनिकरानत्र किरसि ।।७२।।

हे सूर्य ! प्रातरुद्यन् पाश्र्वोद्गतदिशं समीपगतामीशानाभिधां दिशामवन्तं रक्षन्तं पशुपतिं महादेवं निजां स्वकीयां मूर्तिं, स्वरूपं वलितः परावर्तितो गलः कण्ठः यस्मिन् कर्मणि तद् यथा स्यात्तथा, कण्ठं वलयित्वा तिरः वक्रं पश्यन् अवलोकयन्, विलोलन्त्या चञ्चन्त्या रत्नाल्या रत्नौघेन खचितस्य जटितस्य कुण्डलस्य रूचा कान्त्या एतान् अरुणोद्योतान् रक्तप्रकाशान् किरणनिकरान् किरणसमूहान् किरसि प्रसारयसि। प्रातरुद्यन् सूर्यः समीपस्थमीशानकोणमवन्तं पशुपतिं वक्रीकृतग्रीवः पश्यति तेन च प्रचलत्कुण्डल-खचितानां रत्नानां भासा अरुणितान् किरणसमूहान् विकिरतीति भावः।

हे सूर्य ! प्रातःकाल उदित होते हुए तुम पास में स्थित ईशान कोण की रक्षा करने वाले निजमूर्ति-शिव को ग्रीवा मोडकर देखते हुए, चञ्चल रत्नावली जटित कुण्डलों की कान्ति के कारण अरुण प्रकाश वाले किरण समूहों को विखेरते हो ।।७२।।

दिनान्ते वह्निभ्यो वितरसि महः स्वीयमुदितः
पुनः प्रातर्गृह्णास्यखिलजनतामोद ! तरणे !
तदेवेदं संध्याद्वितयमुपलभ्यारुणतरं
भवद्विम्बोल्लासानरूणिमभरानुद्धरयति ।।७३।।

हे अखिलजनतामोद ! समग्रलोकस्य प्रहर्षस्वरूप ! तरणे ! सूर्य ! दिनान्ते दिनस्यावसाने स्वीयं मह आत्मनस्तेजो वह्निभ्यो वितरसि ददासि, पुनः प्रातः प्रत्यूषे उदितो गृह्णासि आधत्से। सूर्यो हि साथं स्वतेजोऽग्नौ निदधाति प्रातश्च पुनरादत्त इति पौराणिकी वार्ता। सूर्यस्य तदेवाग्नौ हितं तेजो संध्याद्वयमुपलभ्यारुणतरं भवद् अरुणिम्नो

रक्तिम्नो भरः आधिक्यं यत्र तथाभूतान् भवतो बिम्बस्य मण्डलस्योल्लासान् उन्मेषान् उद्धरयति प्रकटयति ।

हे समग्र जनता के आमोद सूर्य ! सायंकाल में अपना तेज अग्नि को समर्पित कर प्रातःकाल उदित होते हुए फिर ले लेते हो। वही तेज दोनों संध्याओं को पाकर और भी अरुण (होकर) तुम्हारे बिम्ब से उठने वाले अरुणिमा के आधिक्य का उद्घाटन करता है।

इह प्रातः सायं विधिवदनलेऽग्न्याहितहुत
हविर्द्रागावालुं यदि निखिलर्वाहिमुंखमयः ।
मुखाग्नेरुल्लासादरुणसितरां तत्सुकवयः
कथंकारं तारं त्वयि तपन ! संशेरत इमे ॥७४॥

हे तपन ! इह लोके यदि प्रातः प्रत्यूषे सायं च अनलेऽग्नौ विधिवद् विधिपूर्वकम् अग्न्याहितैः आहिताग्निभिः श्रोत्रियैः हुतं हविः हव्यम् द्राक् शीघ्रम् आदातुं ग्रहीतुं निखिलर्वाहिमुंखमयः सर्वमरीचिमुखमयो मुखाग्नेरुल्लासाद् उद्भासनाद् अरुणसितरां अरुणतरो विभासि । तत् सुकवयः त्वयि भवति कथंकारं कस्मात् कारणात्, तारमुच्चैः संशेरते विचिकित्सन्ति ॥

हे सूर्य ! संसार में आहिताग्नि श्रोत्रिय ब्राह्मणों द्वारा प्रातः साय विधिवत् अग्नि में डाली गई हवि को शीघ्र ही स्वीकार करने के लिए पूर्णतया लपटों से निर्मित मुखवाले तुम मुखाग्नि के विकास के कारण यदि अधिक अरुण मालूम पडते हो तो सुकवि लोग तुम में (अरुणिमा के कारण) क्यों जोरदार संशय करें ?

पुरस्ते मंगल्यो विलसति सदा रत्न-कलशो
रवे ! प्रातर्मन्ये विलसति ततोऽस्मादरुणिमा ।
महस्तोमे प्रादुर्भवति भवतोऽथास्फुटदृशा-
मदृशस्ताम्रं त्वां तदहह ! मुधैवाभिदधते ॥७५॥

हे रवे ! सूर्य ! तव पुरः सदा मङ्गल्यो मङ्गले साधुरिति मङ्गल्य (तत्र साधुः)इति यत्. । शुभावह इत्यर्थः,मङ्गल्यरत्नकलशस्य हेतोः प्रातः अरुणिमा रक्तता ते विलसति शोभते । ततोऽस्मान् महसां तेजसां स्तोमे समूहे प्रादुर्भवति प्रकटिते सति अस्फुटदृशाम् अस्पष्टपश्यतामदृश्योऽनालोक्यो भवति स घटः । अहह (जना) मुधैव व्यर्थमेव त्वां ताम्रं रक्तवर्णम् अभिदधते । प्रातः प्रतनुप्रकाशः सूर्यो मंगलरत्नघटं पुरो निधाय चलति रत्नाभाजनितश्चारुणिमा दृश्यते तत्पश्चान्महति सूर्यतेजसि प्रकटिते स घटस्तस्याभा च तत्रैव लीना न दृश्यते । इत्थं सूर्यस्यैवारुणता प्रत्यूष इति वचो मुधैवेति । उत्प्रेक्षा ।

हे सूर्य ! तुम्हारे सामने सदा ही मंगल-रत्नकलश सुशोभित रहता है। मालूम होता है उसी के कारण प्रातःकाल में लालिमा दिखाई देती है। आपके तेजः समूह के प्रकट होने पर अस्पटद्रष्टाओं को वह नहीं दीखता। अतः लोग तुम्हें व्यर्थ ही अरुण बताते हैं।

नलिन्यो यन्नित्यं मुकुलितसुमाक्ष्योऽच्छसलिले
पुरश्चर्यां चेरुः किमपि ललितं भृङ्गनिनदैः ॥
त्रियामाकल्पान्ते परिणतिमिता सैव तरणेऽ
रुणाभं त्वां जाने जनयति सहस्राङ्कुरतरुम् ॥७६

हे तरणे ! यद् यतो हि नलिन्यः कमलिन्यो नित्यं सदैव मुकुलितानि मीलितानि सुमानि पुष्पाण्येव अक्षीणि नयनानि यासां ताः, अच्छसलिले पवित्रजले भृङ्गानां षट्पदानां निनदैर्गुञ्जनैः किमपि ललितं चारु यथा स्यात्तथा पुरश्चर्यां पुरश्चरणम् चेरुः चक्रुः। (गायत्रीमन्त्रदीनां जपव्रतं पुरश्चरमुणच्यते । सैव पुरश्चर्या निशारूपप्रलयान्ते फलिता सती त्वामरुणाभं रक्तवर्णं सहस्रमंकुरा यस्य एवं भूतं तरुं वृक्षं जनयति इति जाने । रूपकोत्प्रेक्षयोः संकरः । कमलिनीनां रात्रौ मुकुलिताक्षीणां महतः पुरश्चरणस्य फलं निशान्ते सहस्रांशोरुदय इति भावः।

स्वच्छ जल में पुष्परूपी आँखें मूदे हुए कमलनियों ने जो भौंरों के गुञ्जन से उपलक्षित नित्य ही सुन्दर ढंग से पुरश्चरण किया

रात्रि रूपी कल्प की समाप्ति पर वही फलोन्मुख होकर तुम्हारे रूप में अरुणाभ सहस्र अंकुर तरु को जन्म देता है ।।७६।।

स्वयं सिक्तानेतांस्तरुगहनवल्ल्योषधिभरां-

ल्लसद्द्रागुद्योतानपि खनिजनींस्ताम्रितमणीन् ।

सनाथीकुर्वाणो दधदरुणिमानं दिनमुखे

ददानो भानो ! त्वं क्षणमरुणमूर्तिर्विजयसे ।।७७

दिनमुखे प्रातर् अरुणिमानम् अरुणाभां दधत् त्वं स्वयं सिक्तान् स्वयं संभृतान् तरुगहनवल्ल्योषधिभरान् तरूणां गहनानि वनानि वल्लीनां लतानामोषधीनां च भरान् समूहान् लसन्तश्चकासन्तो द्रागाशु उद्योता भासो येषां तान् खनेराकराज्जनिर्जन्म येषां तान्, ताम्रितमणीन् ताम्रवर्णरत्नान्यपि सनाथीकुर्वाणः स्वकरैराच्छादयन्निति यावत्, अरुणमूर्तिः रक्तशरीरः क्षणो-हर्षो यथा स्यात्तथा मुहूर्तमात्रं वा विजयसे सर्वोत्कर्षेण वतसे ।।७७।।

हे भानो ! प्रातःकाल अरुण आभा धारण किए हुए स्वयं अपने द्वारा खींचे गए तरु वनों लताओं औषधियों तथा चञ्चल किरणों वाले खान से निकले रत्नों को भी (समान भाव स) सनाथ करते हुए अनुरक्त-मूति तुम सर्वोत्कृष्ट हो ।।७७।।

तमीसंगादुद्यत्कलुषभरभावस्त्रिजगतां

भवानेकं चक्षुर्भवनभियातीति तरणे !

प्रगे प्राची वामा स्नपयति सदा कौंकुमरसं-

मुंदा मन्ये तस्मादयम॰णिमा ते विजयते ।।७८।!

हे तरणे ! त्रिजगतां त्रिलोक्या एकमद्वितीयं चक्षुर्भवान् तमीसङ्गाद् अन्धकारस्य साहचर्याद् उद्यन् समुद्गच्छन् कलुषभरस्य मलिनताऽऽधिक्यस्य भावः सत्ता यस्य तथाभूतः भवनं गृहमभियातीति गृहमागच्छतीति विचार्यं प्रगे प्रातःकाले प्राचीवामा पूर्वदिक्सुन्दरी सदा सर्वदा मुदा हर्षेण कौंकुमरसैः केशरजलैस्त्वां

स्नपयति अभिषिञ्चति तस्मात् कारणात् ते तव अयम् अरुणिमा विजयत इति मन्ये। उत्प्रेक्षा०। कौकुंमरसैः स्नपने च कलुषभरत्वं हेतुरिति काव्यलिङ्गमपि। चक्षुर्दोषे केसरजलप्रक्षालनमुपचार इति प्रसिद्धम्।

हे तरणे! तीनों लोकों के एकमात्र चक्षु आप (रातभर) अन्धकार के साहचर्य के कारण प्रातःकाल अधिक मलिनता धारण किए हुए घर की ओर आते हैं। मानो इसलिए प्राची सुन्दरी सदा ही तुम्हें प्रसन्नता के साथ केसर जल से धोती है तुम्हारी यह सर्वंजयी अरुणिमा इसीलिए है ॥७८॥

अतिस्वच्छे गुच्छे विमलमहसां त्वय्युपनते
प्रतिच्छायापूर्वापरगिरिजनेर्धातुनिचयात्।
समन्तादुल्लासं व्रजति कुरुविन्दद्युतिरसा-
वतः प्रातः सायं भवदरुणिमायं विलसति ॥७९॥

हे सूर्य! विमलमहसां निर्मलतेजसामतिस्वच्छे गुच्छे समूहे त्वयि भवति उपनते सति पूर्वापरगिर्योः उदयास्ताचलयो जनिर्जन्म यस्य तस्माद् धातुनिचयात खनिजसमूहात् प्रतिच्छाया प्रत्याभा समन्ताद उल्लासं व्रजति सर्वत उद्गच्छति। अतोऽस्मादेव कारणात् प्रातः सायं च ने तव कुरुविन्दद्युतिर्मुस्ताककान्तिः (कुरुविन्दो मेघनामा मुस्ता मुस्ताकमस्त्रियाम इत्यमरः) अयम् अरुणिमाऽरुणत्वं विलसति शोभते। उपमोत्प्रेक्षयोः संकरः।

हे सूर्य! निर्मल तेज के स्वच्छ गुच्छे जैसे आपके उदित होने पर मानो उदयाचल पर उत्पन्न होने वाली गेरू आदि धातुओं के समूह से (उनकी) प्रतिच्छाया उठा करती हैं। इसलिए प्रातः सायं तुम्हारी मोथे (के रस से सिक्त) जैसी यह लालिमा शोभित हुआ करती है।

द्विजाधीशे पत्यौ तपन! भवता हन्त! गमिते।
दशां दीनां लीनास्वथ कुमुदिनीषु ध्रुवमियम्।
रुषा दोषां योषा ज्वलति तिमिरैरिन्धनभरै-
र्भमुक्ताभारुण्यं तदुषसि तवाथ भ्रमिरपि ॥८०॥

हे सूर्य ! द्विजाधीशे चन्द्रमसि (श्रेष्ठे ब्राह्मणे च) पत्यौ स्वस्वामिनि त्वया भवता दीनां हीनां दशामवस्थां गमिते प्रापिते सति (तस्माच्च) कुमदिनीषु च लीनासु क्षयितासु सतीषु भैर्नक्षत्रैर्मुक्ता आभा यस्यां तथाभूता अथवा भानां नक्षत्राणां मुक्तावद् आभा यत्र सा दोषा एव योषा रात्रि र्योषिद् रुषा कोपेन ध्रुवं निश्चितं तिमिरैः-रन्धकारैरेवेन्धनभरैरिन्धनातिशयै र्ज्वलति । तत् तस्मादेवोषसि प्रत्यूषे तव भवत आरुण्यं रक्तिमा भ्रमिरपि भ्रमणं चापि वर्तते ।

हे सूर्य ! तुम्हारे द्वारा चन्द्रमा की दीनदशा करने पर और कुमुदिनियों के विलीन होने पर रात्रि रूपी स्त्री नक्षत्रों की मोतियों जैसी आभा से वंचित होकर क्रोधवश अन्धकार रूपी ईंधन मे जल उठती है । इसीकारण प्रातःकाल में अरुणिमा छा जाती है और तुम भी भटकते फिरते हो ।

> उषः काले वेदाध्ययनविसरल्लोलरसनो-
> च्छ्वसद्रागैर्मन्येऽरुणति भवतो मण्डलमिदम् ।
> विनिह्नुताघातादृदलितकुरुविन्दद्युतिभरा-
> दमुष्माद् द्रागुद्यन् दिनकर ! दिशोऽप्यारुणयसे ॥८१॥

हे दिनकर ! भवतः तव इदं मण्डलम् उषः काले वेदाध्ययने वेदपाठे विसरन्तीनां प्रसारं प्राप्तानां लोलानां चपलानां रसनानां जिह्वानाम उच्छ्वसद्भिः प्रसरद्भिः रागैः रक्तिमभिः अरुणति रक्तवर्णं जायते । मन्ये इति उत्प्रेक्षायाम् । विनिह्नुतं गुप्तं यथा स्यात्तथा भूतादाघातात पेषणाद् दलितानां संपिष्टानां कुरुविन्दानां मुस्तानां द्युतिरिव द्युतिः कान्तिस्तस्या भरः आधिक्यं यस्मिन् तथाभूताद अमुष्माद् एतस्मान् मण्डलाद् द्राक् शीघ्रम् उद्यन् उद्गच्छन् त्वमिति शेषः, दिशोऽपि समन्ताद अरुणयसे रक्तवर्णाः करोषि । प्रातःकाले वेदाध्ययनं कुर्वतां विप्राणां विलसन्तीनां चपलानां जिह्वाना मुद्गच्छन्तीभिररुणाभाभिरेव सूर्यस्य मण्डलं रक्तवर्णं जायते । तस्माच्च संपिष्टमुस्तानिभान् मण्डलात् सत्वरम् उद्गच्छन् सूर्यः

स्वयमपि रक्तवर्णः सन् समन्ताद् दिशोऽपि अरुणाः करोतीत्यर्थः तद्गुणोत्प्रेक्षयोः संकरः ।

हे सूर्य ! प्रातःकाल वेदाध्ययन में चलती हुई चञ्चल जिह्वाओं की उठती हुई लालिमा से मानो तुम्हारा मण्डल रक्तवर्ण हो जाता है । और फिर गुप्त चोटों से (धीरे धीरे) पीसे गए मोथे जैसी आभा से भरपूर उस मण्डल से शीघ्रता के साथ उदित होते हुए तुम चारों ओर से दिशाओं को भी लाल कर देते हो ।

क्षणं प्रातर्निद्रा-प्रहृति-दयितश्लेषविरहै-
र्निमित्तैः शोणा ये जननयनकोणा दिनमणे !
प्रतिच्छाया तेषां मुकुरसदृशेऽच्छे त्वयि लस-
त्यहो तां जानीते बत न कतिधान्तः कविजनः ।।८२।।

हे दिनमणे ! प्रातः निद्राया प्रहृतेर्विनाशाद् दयितस्य प्रियस्य श्लेषविरहैरालिङ्गनत्यागैः निमित्तैः कारणभूतैः क्षणं शोणा रक्तवर्णा ये जनानां प्रेयसां प्रेयसीनां च नयनकोणा नेत्रप्रान्ताः तेषां प्रतिच्छाया मुकुरसदृशेऽच्छे दर्पणवत्स्वच्छे त्वयि भवति लसति शोभते । बत अहो ! आश्चर्यम्, कविजनः कविलोकः तां कतिधा कियद्भिः प्रकारैः अन्तर्मनसि न जानीते नावगच्छति अवगच्छत्येवेति काकुः । सूर्यागमने निद्रात्यागात्प्रियालिङ्गनस्याप्यभावस्तस्माद्रुषा च प्रेयसां रक्तकोणानां नयनानां स्वच्छे सूर्यबिम्बे फलिता च्छाया कविभिरनेप्रतर्क्यते इति कवेः भावः । उत्प्रेक्षालंकारः ।

प्रातः काल निद्रा टूटने से प्रियतम के आलिङ्गन से वियुक्त लोगों के रक्तवर्ण नेत्र कोणों की प्रतिच्छाया दर्पण जैसे निर्मल सूर्य बिम्ब में पड़कर सुशोभित होती है । आश्चर्य है कि कवि लोग अपने मन में न जाने उसे कितने प्रकार से समझते हैं ।

तमिस्रालीव्यालीहृतिषु हरसे दीपकमणीन्
भमण्यालीर्भाते पिदधति खनागेऽतिमहति

तदोजः स्वीकुर्वन्नरुणिमभरं नीरजकुले
दधानो भानो ! त्वं क्षणमरुणमूर्तिर्विजयसे ॥८३॥

तमिस्रालीव्यालीनां तमःकृष्णरात्रिनागीनां हतिषु हत्यासु सतीषु दीपकमणीन् प्रदीपरत्नानि हरसे अपनयसि ! भीते भयं गतेऽतिमहति विशाले खनागे आकाशसर्पे भमण्याली: नक्षत्ररत्नसमूहान् पिदधति अन्तर्दधति सति तस्य आकाशस्य तस्या नक्षत्रमालाया एव वा ओजः तेजः स्वीकुर्वन् आददानस्त्वं क्षणं यथा स्यात् तथा अरुणमूर्तिः रक्ताकृति र्विजयसे। तमोरात्रौ हत्वा तासां दोपकमणोन् लुण्ठसि ततो भीतो व्योमनागो स्वनक्षत्रमणीन पिदधाति त्वं च तस्य तेषां वा ओजः शक्तिसारं गृहीत्वा कमलेषु अरुणतां संभरन् क्षणमरुणाकृतिः शोभस इति भावः।

हे भानो ! अंधेरी रात्रि रूपी नागिनों की हत्या करने पर (उनकी) दीपक रूपी मणियों को छीन लेते हो। तब आकाशरूपी महानाग द्वारा भयवश अपनी तारा रूपी मणियों को छिपा लेने पर अरुणिमा मे भरपूर उसके तेज को स्वोकार कर कमल समूह में समाविष्ट करते हुए तुम क्षण भर के लिए अरुण मूर्ति धारण कर विजयी होते हो।

तमस्तारं तष्ट्वा तनुमपि तनूकृत्य च रजो
यतस्तेजस्तत्त्वे स्थित इयति सत्वेऽस्यहरहः।
तदेतन्मार्तण्डोपदिशति हितं त्वय्यविरतं
क्षणं रक्ते लोकः किसलयति तर्कान्न कियतः ॥८४॥

हे मार्तण्ड ! यत् त्वं तारं तमोऽधिकमन्धकाररूपं तमोगुणं तष्ट्वा खिलीकृत्य रजश्च तनूकृत्य क्षीणं विधाय अहरह प्रतिदिनम् इयति एतावत्यधिके सत्त्वे सत्त्वगुणे तेजस्तत्त्वे स्थितस्तिष्ठसि। तत् एव त्वयि अविरतं निरन्तरम् एतद् हितं उपदिशति शास्ति यत् क्षणं स्वल्पकालं यावदपि रक्ते सति रागलिप्ते सति लोको जनः कियतः कति तर्कान् विचारान् न किसलयति न पल्लवयति। नीरागेण मनुष्येण वर्तित-

व्यम् ! क्षणं यावदपि रागाविष्टं जनं लोको न सहतेऽनेकशश्च तर्कयति, यथा प्रातः मुहूर्तमात्रमेव रागं दधतं सूर्यमिति भावः ॥८४॥

घोर अन्धकार रूपी तमोगुण को भेदकर और धुंधलके रूपी रजोगुण को क्षीण करके तुम इतने अधिक तेज रूपी सत्त्व गुण को धारण करते हो। तुम्हारी यह शाश्वत स्थिति लोगों को यह हितकर उपदेश देती है कि क्षणभर के लिए भी रक्त (सांसारिकता में आसक्त) व्यक्ति के विषय में लोग न जाने कितनी कल्पनाएँ कर डालते हैं।

तमःस्तोमा वीराः समररसतः सम्मुखगताः
क्षता मन्ये क्षत्रोद्भवन ! भवतो मण्डलमिदम् ॥
विभिद्योच्चैर्यान्ति प्रतिगतरुषेव क्षणमत-
स्तवाङ्गे रागोऽयं विलसति नरागोहर रव !८५॥

क्षत्राणामुद्भवनं प्रभवो यस्मात्तत्संबुद्धो क्षत्रोद्भवन ! सूर्याद् विपुलं क्षत्रियकुलं प्रसृतमिति पुराणी वार्ता। हे सूर्य ! समरे रसतः युद्धे उत्साहवशाद् तव सम्मुखगता योद्धुमभिमुखमायाता वीराः शूरास्तमःस्तोमाः अन्धकारसमूहाः क्षताः सन्तो भवत इदं मण्डलं विभिद्य भित्त्वा उच्चैर्यान्ति (द्वाविमौ पुरुषव्याघ्र ! सूर्यमण्डलभेदिनौ। परिव्राड् योगयुक्तो रणे चाभिमुखो हतः। इति महाभारतम्) अतः हे ! नराणां आगांसि हरति तथाभूतः रवे ! सर्यः ! रुषेव प्रतिक्रियाकोपादिव जातस्तवाङ्गे भवतो वपुषि अयं रागोऽरुणिमा विलसति शोभते ॥८५॥

हे क्षत्रियकुलोद्गम ! युद्ध के उत्साह से सम्मुख आए हुए तमः पुञ्ज रूपी वीर क्षत होकर आपके मण्डल को भेदकर उच्चगति पाते हैं। मानो इसीलिए, हे मनुष्यों के पापों को हरने वाले सूर्य ! प्रति क्रिया स्वरूप कोप के कारण क्षणभर के लिए तुम्हारे शरीर में यह अरुणिमा सुशोभित होती है ॥८५॥

द्विपः सौनासीरो नियतमिह पूर्वामधिगतः
समायास्यन्माद्यत्परगजमतेः कोपितमनाः ।

प्रतिप्रातर्मन्ये तव तपन ! बिम्बे वितनुते

समाघातं कौंभं तदनुगतसिन्दूरमिह यत् ॥८६॥

हे तपन ! मन्ये प्रति प्रातः समायास्यत आगमिष्यतो माद्यतो मत्तस्य परस्य गजस्य अन्यस्य हस्तिनो मतेर्विचारात् कोपितमनाः कुपितचित्तः सौनासीरो सुनासीरस्येन्द्रस्यायमिति सौनासीरः द्विपः हस्ती ऐराव इत्यर्थः, इह पूर्वां दिशमधिगतः प्राप्तः सन् तव बिम्बे भवन्मण्डने कौम्भं समाघातं स्वगण्डस्थलेनाघातं वितनुते पुनः पुनः करोति यत् यतो हि इह बिम्बे तदनुगतम् (स समाघातोऽनुगतो येनेति बहुब्रीहिः) सिन्दूर वर्तते इति शेषः। आगमिष्यतोऽपरगजस्य बुद्धया पूर्वां दिशं प्रति प्रातरायात ऐरावतस्ते बिम्बं स्वकुम्भेन ताडयति तस्मात्संलग्नेन सिन्दूरेणैव तव मण्डलमरुणमिति उत्प्रेक्षितम् ॥८६॥

हे सूर्य ! मानो किसी आने वाले अन्य हाथी के बिचार से कुपित हृदय ऐरावत पूर्व दिशा में आकर प्रतिदिन प्रातःकाल में तुम्हारे बिम्ब पर अपने मस्तक से चोट करता है। जिसके कारण सिन्दर बिम्ब में लग जाता है ॥८६॥

परिज्ञातं प्रातस्तपन ! भवदारुण्यमिह यत्

तवेतत्पूर्वाद्रिस्फुरदमलभावत्कमणयः।

परिस्फूर्जत्क्रीडारसनभवक्रीडाविलसनैः

नजन्त्युच्चैर्लीलारुणितहरिदाकाशविसराः ॥८७॥

हे तपन ! यद् यस्मात्कारणाद् इह भवतस्तव आरुण्यं रक्तवर्णत्वं तद् एतद् परिज्ञातम्। उच्चै लोलाया शोभया अरुणिता रक्तीकृता हरितां दिशामाकाशस्य च विसरा प्रसरा यैस्ते तथाभूताः पूर्वाद्रौ उदयाचले स्फुरन्तो भ्राजमाना अमला निर्मला भावत्कमणयः सूर्यकान्तमणयः परिस्फूर्जंता प्रसरता क्रीडारसनेन खेलानन्देन भवे संसारे क्रीडाविलसनैः क्रीडाचेष्टाभिः एतदारुण्यं स्रजन्ति रचयन्ति। उदयाचले निर्मलाः सूर्यकान्तमणयः वर्धमान - क्रीडा - विलासैः स्वशोभया व्योम्नो दिशां च भागान् अरुणं रञ्जयन्त एतदुत्पादयन्तीतिभावः। उत्प्रे० ॥८७

हे सूर्य आपकी यह लालिमा जिस कारण से है, वह समझ में आ गया। अपनी अत्यधिक शोभा से आकाश और दिग्भागों को लाल बनाती हुई देदीप्यमान निर्मल सूर्यकान्त मणियाँ वर्धमान क्रीडारस के साथ संसार में अपनी क्रीडामयी चेष्टाओं से उसकी सृष्टि किया करती हैं।

समन्तादारक्तास्तव मिहिर ! नक्ताभिविरतौ
करा गेहे गेहे किमपि दधते कौतुकमिदम् ।
पटं दृष्ट्वा शोणं यदिह परकान्तोत्तरपटी-
भ्रमात्कान्ता पत्यौ कलयति न कां तां किल रुषम् ।।८८।।

हे मिहिर ! नक्ताभिविरतौ निशावसाने समन्तात् सर्वतः आरक्ता रक्तवर्णास्ते करा उद्योता गेहे गेहे प्रतिगृहं किमपि इदं कौतुकं कुतूहलं दधते कुर्वन्ति यत् पटं कान्तस्योत्तरीयं वस्त्रं शोणं रक्तवर्णं दृष्ट्वा विलोक्य परकान्ताया अपराङ्गनाया उत्तरपट्या उत्तरीयस्य वसनस्य भ्रमं दधती कान्ता पत्यौ भर्तरि कां तां रुषं कोपं न कलयति कुरुते। किल। सर्वथाऽपि तस्मै कुप्यतीत्यर्थः। तद्गुणभ्रान्तिमतोः सङ्करः ।।

हे सूर्य ! रात्रि के समाप्त होने पर तुम्हारी किरणें सब ओर घर घर में अनोखा कुतूहल किया करती हैं कि (प्रिय के उत्तरीय) वस्त्र को लाल देखकर अन्य नारी के दुपट्टे की भ्रान्ति में पडी प्रिया पति पर कैसा-कैसा कोप नहीं करती ।।८८।।

दिनेश ! त्वं तथ्यं तनुरसि गिरीशस्य यदिह
प्रभाते ध्वान्तानां प्रलयमतिरोषाद् विदधतः ।
प्रभाते शोणाभा भवति भुवने भालजनुषो
दृशः शुष्मोल्लासैररुणितदिगाभोगविसरैः ।।८९।।

हे दिनेश ! त्वं तथ्यं सत्यं गिरीशस्य शिवस्य तनुः शरीरम् असि। यदिह यतो हि भुवने प्रभाते प्रत्यूषेऽतिरोषतो घोरकोपाद् ध्वान्तानां

तमसां प्रलयं विनाशं विदधतः कुर्वतः (तस्य) भाले मस्तके जनुर्जन्म यस्यास्तस्या दृशोक्ष्णः अरुणिता रञ्जिता दिशामाभोगविसराः प्रसारा यैस्तथाभूतैः शुष्मोल्लासैः अनलज्वालाभिः भवति त्वयि शोणा आभा अरुणा कान्ति प्रभाते प्रकर्षेण भाते शोभते। त्वयि प्रभाते या अरुणा आभा भुवने-भाति सा तु तव शिवतनुत्वान् मस्तके स्थितस्य नेत्रस्य अन्धकारं प्रति कोपवशात् स्फुरतोऽग्नेर्ज्वालाभिः कृतेत्युत्प्रेक्षितम्। ८९

हे दिनेश! सचमुच तुम शिव की मूर्ति हो क्योंकि प्रभात में जो अरुण कान्ति तुम में सुशोभित होती है वह अति रोष से अन्धकार का विनाश करते हुए (शिव के) मस्तक में जन्मे नेत्र की, दिक् प्रसार को अरुण वना देने वाली, आग की लपटों के ही कारण तो है।

तवारुण्यं प्रातः कथयतु कविः को नु तरणे!
यदीयैरुद्योतैं र्भवति भुवने कौतुकभरः।
यतो गुञ्जामुक्ताभरणमधिकायं कलयतां
प्रवालालङ्कारः परिणमति तुल्यो मृगदृशाम् ॥९०॥

हे तरणे! प्रातः प्रत्यूषे तव आरुण्यं कः::कविः कथयेन्नु? यदीयैरुद्योतै र्यस्य करैः भुवने कौतुकभरः कुतुहलाधिक्यं भवति। यतोऽधिकायं स्वशरीरे गुञ्जामुक्तानां गुञ्जासदृश मौक्तिकानां गुञ्जानां मौक्तिकानां चेति वा आभरणमाभूषणम् कलयतां दधतां जनानां मृगदृशां सुन्दरीणां प्रवलालङ्कारस्तुल्यः परिणमति। मीलितमलङ्कारः।

हे सूर्य! तुम्हारी प्रातःकालीन अरुणता का, जिसकी किरणों के कारण दुनियां में तमाशा खड़ा हो जाता है, वर्णन कौन कवि करे? क्योंकि गुञ्जा या मोतियों और मूंगों का अलङ्कार भी समान ही दिखाई देता है ॥९०॥

पुरुहूतहरिद्वधूर्दिनेशे हृदयेशे वत रक्तभावभाजि।
अभियाति गृहान् स्पृहावती किमु काश्मीर रसैर्निषिञ्चति ।९१

हृदयेशे प्रेयसि दिनेशे सूर्ये रक्तं भावम् अनुरागं भजते तथाभूते सति अनुरागभावभृते सतीत्यर्थः। गृहान् अभियाति प्रवासाद्गृहमागच्छति सति, स्पृहावती सोत्कण्ठा पुरुहूतहरिद्वधूः प्राची दिशा (तस्य स्वागताय) गेहान् काश्मीररसैः केशरद्रवैः निषिञ्चति क्षालयति किम्? संदेहोऽलङ्कार।

क्या पूर्वदिशा रूपी सुन्दरी अनुरागभरे (अपने) हृदयेश सूर्य को आता देखकर प्रेमवश (उसके स्वागतहेतु) घरों में केसर का छिड़काव कर रही है ॥९१॥

महोभिस्तापानां सरणिमथ जाड्यं परिहरं—
स्त्रिलोकीलोकानां मनसि जनयन् संमुदभरम्।
विधोर्भूयो भूयः किमपि जडिमानं प्रविकिरन्
निजं चित्रोस्रत्वं दिवसकर! तथ्यं वितनुषे॥ ९२

हे दिवसकर! हे सूर्य! महोभिः स्वतेजोभिस्तापानामुष्णतायाः सरणिं मार्गं जाड्यं शीतं निद्राजनितमकर्मण्यत्वं वा परिहरन् दूरीकुर्वन (उदयतः सूर्यस्य करा नाधिकं तापं जनयन्तोऽपि शीतमपाकुर्वन्तो निष्क्रियत्वमपि परिहरन्ति) तेन च त्रयाणां लोकानां समाहारस्त्रिलोकी तस्या लोकानां जनानां मनसि हृदये संमुदां प्रहर्षाणां भरमाधिक्यं जनयन् भूयोभूयः पुनः पुनर्विधोश्चन्द्रमसो जडिमानं जाड्यं तज्जनितं शैत्यमिति यावत् किमपि अनिर्वचनीयत्वेन प्रविकिरन् प्रसारयन् (तेजसाभिभूतं हतप्रभं तंविदधत्) निजं चित्रोस्रत्वं चित्रा विभिन्नवर्णा विचित्रप्रभावाश्चोस्राः करा यस्य तस्य भावस्तत् तथ्यं यथा स्यात् तथा वितनुषे करोषीति यावत्। यैः करैः लोकस्य जाडयं ह्रियते तैरेव चन्द्रमसस्तत् क्रियत इति कराणां वैचित्र्यम्॥

हे सूर्य! अपने तेजसे संतापों के मार्ग (कष्ट देने की) मनोवृति तथा जाडे एवं निष्क्रियता को दूर करते हुए, त्रिलोकी के मनुष्यों को हर्षित करते हुए तथा पुनः पुनः चन्द्रमा की जडता को प्रसारित करते हुए सचमुच अपने चित्रोस्रत्व (विभिन्नवर्ण अथवा अनोखी किरण वाला होने) को सिद्ध करते हो ॥९२॥

युष्मद्धामोत्थपूर्वापरगिरिविपिनोज्जृम्भदुद्दामवह्नि—

ज्वालोद्योतावलीभिर्वलयितुमुभयोः सन्ध्ययोर्मण्डलं ते ।

प्रातः सायं जनानामरुणिमनि निजे हन्त ! नानावितर्का—

नर्कान्तः संतनोति प्रयतमुनिवितीर्णाम्बुराशे ! पुरस्तात् ।९३।

हे अर्क ! सूर्य ! प्रयतैर्नियमस्थितैर्मुनिभिर्वितीर्णः प्रदत्तोऽम्बुनो जलस्य राशिर्यस्मै तथाभूत ! प्रातः सायं दिनारम्भे तदवसाने च पुरस्तात् अग्रे यथा स्यात् तथा ते तव मण्डलं युष्माकं धामभ्यः तेजोभ्य उत्थितस्य उत्पन्नस्य पूर्वापरगिर्योरुदयास्ताचलयो र्विपिनयोर्वनयोरुज्जृम्भतो वर्धमानस्योद्दाम्नोऽसीमस्य वह्नेरग्ने ज्वीलानामर्चिषामुद्योतानां प्रभाणामवलीभिः समूहै र्वलयितं परिवेष्टितं सत् उभयोः सन्ध्ययोः समये निजे अरुणिमनि स्वकीयारुणताविषये जनानामन्तः लोकानां हृदये नानावितर्कान् विभिन्नविचारान् संतनोति जनयतीति हन्त ! आश्चर्यमेतत् ।।उत्प्रेक्षालङ्कारः ।।

हे तपस्वियों द्वारा दत्तार्घ्य सूर्य ! प्रातः सायं दोनों सन्ध्याओं में (लोगों के) समक्ष स्थित तुम्हारा मण्डल तुम्हारे तेज से उदयास्ताचलों के वनों में उठकर फैलती हुई आग की लपटों की आभा के समूहों से घिर कर अपनी लालिमा के विषय में लोगों के मन में विभिन्न कल्पनाओं को जन्म देता है । है न आश्चर्य की बात !

दीव्यत्कुण्डलिनीविभावनवशात्ताद्रूप्यमुद्गच्छतो

विद्युत्कोटिसमप्रभं दिनकृतो मन्ये वपुः स्फूर्जति ।

प्रातः सायमसावहो निजरुचा सरञ्जिताशामुखो

दृश्येताः कथमन्यथास्य परितो लोकोत्तरः शोणिमा ।।९४।।

दीव्यन्त्याः प्रकाशमानायाः कुण्डलिन्या तदाख्याया योगशक्ति-कारणभूताया विभावनवशात् साधनावशात् ताद्रूप्यं प्रकाशस्वरूपम् उद्गच्छतः प्राप्नुवतो दिनकरस्य सूर्यस्य विद्युतां सौदामनीनां कोटीनां समा तुल्या प्रभा कान्तिर्यस्य तथाभूतं वपुः शरीरं ब्रिम्वमिति यावत्

स्फूर्जति प्रकाशते इति मन्ये शङ्के। आ इति वितर्के। अन्यथा प्रातः सायं निजरुचा स्वकान्त्या संरञ्जितानि आशानां दिशां मुखानि येन तथाभूतो लोकोत्तरोऽलोकिकः शोणिमा रागोऽस्य परितः कथं केन कारणेन दृश्यः ? कुण्डलिनीजागरणाद् बिद्युत्कोटिसमप्रभो जायमानः सूर्यः प्रातःसायं तदधिगतेननालौकिकेन शोणिम्ना दिशो रञ्जयतीति भावार्थः। काव्यलिङ्गानुप्राणितोत्प्रेक्षा ॥६४॥

लगता है प्रकाशस्वरूप कुण्डलिनी की साधना के कारण तादात्म्य को प्राप्त सूर्य का बिम्ब कोटि-कोटि विद्युतों के समान प्रभा से देदीप्यमान हो गया है नहीं तो प्रातः सायं अपनी कान्ति से दिशाओं के मुखों को रँग देने वाली अलौकिक लालिमा उसमें और कहाँ से दीख पड़ती है ॥६४॥

चकोरीभिश्चान्द्रद्युतिचुलकनोच्चावचरुचि—
स्फुटोदञ्चच्चञ्चूपुटचटुलताचञ्चुमतिभिः।
चिरं चित्ते चिन्ताचकितमरुणैर्लोचनचयैः
क्रुधा दृष्टः प्राच्यामरुणरुचिरुद्धैर्विचरसि ॥६५॥

चान्द्रयाऽचन्द्रमस द्युत्याः कान्त्याश्चुलकने पाने उच्चावचाया-ऽऽर्ध्वाधो गच्छन्त्या रुच्याः कारणात् स्फुटं यथा स्यात्तथा उदञ्चत ऊर्ध्वः गच्छतः चञ्चुपुटस्य तुण्डाग्रस्य चटुलतया चपलतया युक्ता मतिर्यासां ताभिः (तेनवित्तश्चुञ्चुप्चणपाविति संयुक्तार्थे चञ्चु प्रत्ययः) चकोरीभिः प्राच्यां पूर्वस्यां दिशि अरुणरुचिरुद्धैरुदयतः सूर्यस्यारुणभाभिः क्लिष्टैअथवा क्रोधवशादरुण कान्तिभि र्गाढतरं रक्तैः स्वभावेन अरुणैर्नेत्रैःररुणैं रक्तवर्णैः लोचनचयै र्नयनसमूहैः चित्ते मनसि चिन्ताचकितं यथा स्यात्तथा दृष्टो विचरसि भ्रमसि। सूर्योदयेन चन्द्रद्युतिपानवञ्चिताश्चकोर्यः क्रुधाऽरुणैर्नयनेर्व्यंवधानकारिणं विचरन्तं पश्यन्तीत्यर्थः॥ उत्प्रेक्षालङ्कारः॥

चन्द्रमा की किरणों के पान में उत्कट रुचि के कारण स्पष्टतः उठते हुए चञ्चुपुट की चपलता से युक्त चञ्चलमति चकोरियों के

द्वारा पूर्वदिशा में अरुण प्रकाश से अवरुद्ध अरुण नयनों से, मन में चिन्ता चकित क्रोध के साथ, देर तक देखे जाते हुए विचरण करते हो।

प्रातः पुरन्दरदिशो हरिणीदृशोऽसा-
वर्धोन्नतः कुच इव श्रितकुङ्कुमश्रीः
कल्माषयन्निजरुचा वियदुज्जिहानो
मानोन्नतिं सपदि यच्छतु नो दिनेशः ॥६६॥

प्रातःकाले पुरन्दरदिशो हरिणीदृशः प्राच्याः सुन्दर्याः श्रिता कुङ्कुमेन केसरलेपेन या श्रीः शोभासा येन तथाभूतोऽर्धोन्नतः अर्धं निर्गतः कुच उरोज इव (प्रतीयमानः) निजरुचा स्वकान्त्या, वियद् गगनं कल्माषयन् सुवर्णयन् उज्जिजहान उदीयमानो दिनेशः सूर्यो नोऽस्म्यं सपदि शीघ्रम् मानोन्नतिं मानस्य उन्नतिं विकासं यच्छतु ददातु। उत्प्रेक्षालङ्कृतिः सा च रूपकेन संकीर्यंते ॥६६॥

प्रातःकाल में पूर्वदिशा रूपी सुन्दरी के, केसरलेप से सुशोभित अर्धनग्न कुच के सदृश अपनी आभा से आकाश को स्वर्णिम वनाता हुआ अर्धोदित सूर्य शीघ्र ही हमें मानोन्नति प्रदान करे ॥

भासा यस्य प्रवासायितमखिलतमो व्योमकासारवासाद्
वल्लर्यो विद्रुमाणामिव करनिकरोद्यद्विलासा यदीयाः।
आसायं यस्य भासा सुरसरणिरुपासाभिरासाद्य तेजः
प्रासादे भाति भानुः स इह मम रुजं हन्तु दासायितस्य ॥६७

यस्य भासा यस्य दीप्त्या अखिलतमः प्रवासायितम् सर्वविधोऽप्यन्धकारोऽपनीतः। यदीयाः यत्सम्बन्धिनः करनिकराणां किरणसमूहानामुद्यन्तो विलासाः प्रसरन्त्यः कान्तयो व्योम्नि एव कासारे वासो यासां तथाभूताः आकाशरूपिणि सरोवरे विद्यमाना सत्यः विद्रुमाभाः वल्लर्यो लता इव प्रतीयन्त इति शेषः। यस्य सूर्यस्य भासा कान्त्या हेतुभूतया उपासाभिः उपस्थितिभिः कारणभूताभिः सुरसरणि देवमार्गोऽन्तरिक्षमिति यावद् आसायं सन्ध्याकालम् यावत् तेजसां प्रासादं

भासां निर्मलतामासाद्य संप्राप्य भाति शोभते। स भानुः इह दासायितस्य दासत्वं गतस्य मम रुजं दुःखं हन्तु विनाशयतु। यस्य तेजोऽखिलमन्धकारं दूरीकरोति, यस्य (प्रातःकालीना:)अरुणकान्तयो गगनसरस्यां पल्लविता विद्रुमलता इव प्रतीयन्ते, यस्य भासाऽन्तरिक्षमासायं प्रकाशते स सूर्य दासस्य मे दुखमपनयतु इति भावः। रूपकोत्प्रेक्षयोरङ्गाङ्गिभावसंकरः।

जिसकी कान्ति ने समूचे अन्धकार को निकाल बाहर किया। जिसकी उदयकालीन किरणों की शोभा मानो आकाश रूपी सरोवर में विद्यमान मूंगे की लताएँ हैं। सन्ध्या आने तक जिसकी आभा के कारण देवमार्ग अन्तरिक्ष निर्मलतेज प्राप्त कर सुशोभित होता है। वह सूर्य दासकोटि को प्राप्त मेरी व्याधि को दूर करे।

उद्वान्तध्वान्तहारी सरसिरुहवनामन्दतन्द्रापहारी
कोकान्तः शोकदारी गगनशिवशिरोरत्नभूषानुसारी।
वारीशायत्यकारी प्रसृमरमहसा दिङ्मृगाक्षीविहारी
शारीरं वो रुगान्ध्यं हरतु करुणया लोकधारी दिनेशः॥६८

उद्वान्तं ध्वान्तं हर्तुं शीलमस्येति उद्वान्तध्वान्तहारी वर्धमानतमोदूरकर्ता सरसिरुहानां वनानां कमलसमूहानाममन्दाया घोरायास्तन्द्राया अपहारी अपहर्ता, कोकानामन्तःशोकस्य चक्रवाकानां मनोरुजोऽपहारकः, गगनमेव शिवस्तस्य शिरोरत्नभूषाया शिरोऽलङ्कारस्य अनुसारीत्यर्थः, शिवशिरसि यथा चन्द्रस्तथा गगनशिरसि सूर्यो विद्योतत इत्यर्थः। वारीशस्य समुद्रस्य आयत्यं दीर्घतां करोति संतनोति तच्छीलं यस्य तम्, प्रसृमरेण प्रसरता महसा तेजसा दिश एव मृगाक्ष्यस्तासु विहर्तुं शीलं यस्य स, लोकधारी लोकानां जनानां धर्ता जीवनदायको दिनेशः सूर्यः करुणया कृपया वो युष्माकं शारीरं शरीरसम्बन्धि रुगान्ध्यं रुजा रोगेण आन्ध्यं नेत्रविकलवत्वं हरतु अपाकरोतु॥६८॥

उद्धत अन्धकार को दूर करने वाले, कमल समूह की घोर निद्रा

को तोड़ने वाले, चकवों के अन्तःकरण के शोक को विदीर्ण करके आकाश रूपी शिव के शिरोभूषण चन्द्रमा का अनुसरण करने वाले, समुद्र में ज्वार उत्पन्न करने वाले अपने फैलते हुए तेज के साथ दिशारूपी सुन्दरियों से विहार करने वाले भगवान् सूर्य अपनी करुणा से आपकी शारीरिक रोग जनित जड़ता को दूर करें ॥९८॥

श्रियं तामायच्छन् सरसिजवनेभ्यः प्रणयिनी—
मयं तारालोकं रजनि रुचि कुत्रापि तिरयन् ।
समन्तादारन्ता नभसि न नमन्ता जननते—
र्निहन्ता ध्वान्तानां त्रिभुवननियन्ता विजयते ॥ ९९

सरसिजवनेभ्यः कमलसमूहेभ्यः प्रणयिनीं प्रीतिकरीं श्रियं शोभामायच्छन् वितरन्, तारालोकं नक्षत्रसमूहं कुत्रापि रजनिरुचि रात्र्यन्धकारे तिरयन् अपह्नुवानोऽयं ध्वान्तानामन्धकाराणां निहन्ता विनाशकः सूर्यः नभसि आरन्ता आकाशे रममाणो जननतेर्लोककर्तृक प्रणामस्य न मन्तेति । न मनुत एव लोकैः कृतां नतिमित्यर्थः । एवं भूतः त्रयाणामपि भुवनानां नियन्ता स समन्तात् सर्वत्रापि विजयते सर्वोत्कर्षेण वर्तते ।

कमलसमूहों को हर्षप्रद शोभा प्रदान करता हुआ और तारों के समूह अथवा प्रकाश को रात्रि की ही छाया में कहीं छिपाता हुआ, आकाश में सर्वत्र क्रीडा करने वाला, तीनों लोकों का नियन्ता, अन्धकारनाशक सूर्य सर्वोत्कृष्ट हैं । (सर्वजयो) है ।

इन्द्राशाचारुभालाभरणमभिनमल्लोकपालावलीनां
मस्तिष्कोद्भासिरत्नच्छविमिलितलसद्राग दीव्यन्मरीचिः ।
निद्रान्धाम्भोजमालास्मितकरणपटुः कोकबालाभिरारात्
सप्रेमोद्वीक्षितोऽसौ दलयतु तरणिः शोकजालान्धन्तां नः ॥१००

इन्द्राशायाः प्रच्या दिशश्चारु सुन्दरं भालाभरणम् अभिनमतां प्रणामं कुर्वतां लोकपालानामिन्द्रादीनाम् अवलीनां पंक्तीनां मस्तिष्केषु

शिरःसु उद्भासिनां प्रकाशितानां रत्नानां मणीनां छविभिः कान्तिभि र्मिलिताः संगता लसद्रागा अरुणिमशोभिता प्रकाशमाना मरीचयः कराः यस्य तथाभूतः निद्रान्धानाम् अत्यन्तं मुकुलितानाम् अम्भोजमालानां कमलावलीनां स्मितकरणे विकासे पटुः दक्षः कोक-बालाभिश्चक्रवाकीभिराराद् दूरादेव सप्रेम उद्वीक्षित आलोकितः असौ गगने उदयन् तरणिः सूर्यो नः अस्माकं शोकजालेन शोकाभिक्येन जनितामन्धतां दलयतु नाशयतु ।१००।।

पूर्वदिशा के भाल का सुन्दर आभूषण, वन्दना करते हुए लोक-पालों की पंक्तियों के सिरों पर सुशोभित रत्नों की कान्ति से मिश्रित सुन्दर अरुणिमा से दीप्त किरणों वाला, नींद के कारण अन्धे पद्मों की मुस्कान लाने में निपुण, सुकवियों द्वारा दूर से ही सप्रेम देखा जाता हुआ ,सूर्य हमारी शोकसमूहों से प्रसूत अन्धता को नष्ट करे।

नानामणिक्यमालालमदमलरुचिव्रातविभ्राजिताभ्रा–
हृण्डा वा विद्रुमाणामुदयगिरितटात्संगृहीताः सलीलम् ।
विस्तीर्णा दिक्षु कीर्णाः करनिकरगता ध्वान्तविध्वंसनार्थं
द्योतन्ते ते समन्ताद् विदधतु कुशलं भास्वतो भानवस्ते ॥ १०१

लसन्तीनां शोभमानानाममलरूचीनां निर्मलकान्तीनां व्रातैः पुञ्जैः भ्राजितं प्रकाशितमभ्रं येन तस्माद, उदयगिरितटाद् उदयाचल-मेखलातः, सलीलं सखेलं यथास्यात्तथा संगृहीता संचिता नानामाणि क्यमाला अनेका माणिक्यावल्यो विद्रुमाणां प्रवालानां वा (तादृशा एव निर्मलाः) करनिकरगता किरणरूपहस्तस्थिताः सन्तो ध्वान्तानां तमसां विध्वंसनार्थं विनाशाय दिशतु। विस्तीर्णा कीर्णाः दिशासु व्यापकं प्रसारिता इव भास्वतो दीप्तिमतः सूर्यस्य ते भानवोंऽशवः समन्ताद् सर्वतो द्योतन्ते प्रकाशन्ते। (ते) (लोकस्य) कुशलं कल्याणं विदधत कुर्वन्तु। प्रातःकालीनाः सूर्यस्य रक्तवर्णा अंशवस्तेनोदयाचलतटात् सखेलं करेषु गृहीत्वा तमोनाशाय सर्वतः दिक्षु प्रसारिता माणिक्यमाला प्रवालपटलानि वेति प्रतीयन्त इत्युत्प्रेक्षितम् ।

निर्मल-कान्तिपुञ्ज से आकाश को प्रकाशित कर देने वाले उदयाचल मण्डल से मानो लीलासहित उठाई हुई तथा हाथ में लेकर अन्धकार का विनाश करने के लिए सर्वत्र दिशाओं में फेंक कर बिखेरी हुई बहुत सी माणिक्य मालाओं अथवा विद्रुम - पटलों - सी द्योतमान सूर्य की किरणें सर्वथा कुशल करें।

सायं मीलन्नवाञ्चत्कमलदलसमुल्लासिकान्तिं गृहीतां
प्रातः प्रीत्या ददानोनु पुनररुणिमोद्रेकविद्योतमानाम्
कोकालीचित्तरागैः सपदि नु परितो रञ्जितो ह्येष ताम्रः
सम्राड् धाम्नां विधत्तामलमिह रविश्चेतसो वाञ्छितं नः॥१०२

सायं दिनान्ते, गृहीतां मीलतां संकोचं गच्छतां नवाञ्चत्कमलदलानां नूतनविकसितानां कमलसमूहानाम् उल्लासिनीं प्रकाशमानां कान्ति भासं प्रातः अरुणिम्नोऽरुणताया उद्रेकेणाधिक्येन विद्योतमानां तां पुनः प्रीत्या हर्षेण (तेभ्य एव) ददानो यच्छन्, कोकालीनां चक्रवाक-समूहानां चित्तरागैर्मनोऽनुरागैः सपदि झटिति परितः सर्वतो रञ्जितः धाम्नां तेजसां सम्राड् ह्येष ताम्रवर्णो रविरिह नश्चेतसोमल वाञ्छितं मनोगत विधत्तां करोतु ॥१०२

सायंकाल में गृहीत मूँदते हुए नवविकसित कमलसमूह की उल्लसित कान्ति का जो प्रातःकाल अरुणिमा की अधिकता के कारण विशेष रूप से भासित होती है, प्रातःकाल फिर से प्रीतिपूर्वक (उन कमलों को) प्रदान करता हुआ, चक्रवाक-समूह के मनोराग से तत्क्षण सर्वतः रँगा होने के कारण ताम्रवर्ण, तेजःसम्राट् सूर्य हमारा मनो वाञ्छित पूरा करे।

तामस्योद्भूततीव्रान्धतमसकलुषं काञ्चनाण्डं स्वतेज-
स्तोमे बिभ्राक्षुरारादुदयशिखरिणो गैरिकैर्लिम्पतीव।
विष्वक्सृतैः करैः स्वैरतिविमलमिमं कौतुकी स चकोर्बुः
प्रोद्यन् प्राच्यां प्रभाते प्रमुदमुदयिनीर्मयमा नः प्रदत्ताम् ॥१०३

प्रभाते प्रातस्तामस्यां तमिस्रायामन्धकारिण्यां रात्रौ, उद्भूतेन प्रकटितेन तीव्रेण दृक्षु पीडाजनकेनान्धतमसेन घोरान्धकारेण कलुषं श्यामिका यस्मिंस्तत् काञ्चनाण्डं सुवर्णमयं ब्रह्माण्डं स्वतेजसां निजधाम्नां तोमे पुञ्जे विभ्राक्षुः दिधित्सुरतिविमलं पूर्णतया स्वच्छं (च) संचिकीर्षुः कौतुकी क्रीडनपरोऽयंमा सूर्यः विश्वक्सृप्तैः सर्वत्रगतैः स्वकरैरेव करैः स्वकिरणहस्तैरुदयगिरेरुदयाचलस्य आरात् समीपे गैरिकैः तन्नामभिः खनीजैर्लिम्पतीव। एवं च प्राच्यां प्रोद्यन् उद्गच्छन् स उदयिनीं वर्धमानां मुदं हर्षं नोऽस्मभ्यं प्रदत्ताम् वितरतु। ब्रह्मणो योनिभूतमण्डं हैमं वर्तते इति पुराणेषु प्रसिद्धम् तच्च तमिस्रायां घोरेण तमसा श्यामं जातं तदेव स्वतेजःपुञ्जे तापयित्वा निर्मलयितुं क्रीडापरः सूर्यः पूर्वं सर्वत्र प्रसृतैः स्व-किरण-करैर्गैरिकैर्लिम्पतीवेत्युत्प्रेक्षा ॥ हेम्नः शुद्ध्यर्थं स्वर्णकारास्तत् गैरिकेण प्रलिप्याग्नौ क्षिपन्तीति प्रसिद्धम् ॥१०३॥

अँधेरी रात में प्रकट अत्यन्त क्लिष्ट अन्धकार रूपी मल से कलुषित सुवर्णमय ब्रह्माण्ड को अत्यन्त स्वच्छ करने को इच्छुक, (अतएव) अपने तेजपुञ्ज में रखने की इच्छा से कौतुकी सूर्य प्रातःकाल में उदित होते समय सर्वत्र फैले हुए अपने किरण रूपी हाथों से उदयाचल के समीपस्थ गेरुओं से लेपा करता है। वह सूर्य हमें अभ्युदयसंपन्न हर्ष प्रदान करे।

यामिन्यां कैरवाल्या विकसनमिषतो नीरजान्याहसन्त्या
कुर्वाणाः सर्वगर्वं निजरुचिभिरमी कोपताम्रा नु खर्वम्।
ध्वान्तप्राप्तावकाशान् हिमकरकिरणान् निर्दयं पीडयन्त—
श्चोलूकानन्धयन्तः शमिह ददतु नो मैहरास्ते मयूखाः ॥१०४

यामिन्यां निशायां विकसनमिषतः स्वविकासव्याजात् नीरजानि कमलानि आहसन्त्या उपहसन्त्याः कैरवाल्याः कुमुदावलिरूपिण्याः प्रतिनायिकायाः सर्वगर्वमखिलं दर्पं निजरुचिभिः स्वकान्तिभिः खर्वं हीनं कुर्वाणा विदधतो, ध्वान्तेऽन्धकारे (अत्याचरितुम) प्राप्तोऽवकाशो लब्धोऽवसरो यैस्तान् हिमकरकिरणान् चन्द्रमसः करान् निर्दयं निष्क-

रुणं यथा स्यात्तथा पीडयन्तः उलूकांश्च दलयन्तः अन्धीकुर्वन्तः, कोपताम्राः कोपेनेव रक्तवर्णास्ते प्रातःकालीनाः प्रसिद्धाः मैहरा मिहिरसम्बन्धिनः सूर्यस्येत्यर्थः, मयूखाः किरणाः इह नोऽस्मान् शं कल्याणं ददतु वितरन्तु। रात्रौ कृतस्यासदृशकर्मणः चन्द्रकरान् कुमुदचक्रमुलूकांश्च सूर्यस्य कराः प्रभाते कोपेनेवारुणाः सन्तो दण्डयन्तीत्युत्प्रेक्षा।

रात्रि के समय स्वयं खिलने के बहाने (मुझाँये) कमलों का उपहास करने वाले कुमुद-समूह के दर्प को प्रातःकाल अपनी कान्ति से चूर-चूर कर देने वाली, तथा अन्धकार में अवसर प्राप्त करने वाली चन्द्रमाकी किरणों को निर्दयतापूर्वक मचलती हुई और उल्लुओं को अन्धा बनाती हुई कोप से लाल सूर्य की किरणें हमें कल्याण प्रदान करें।

कस्तूरीभक्तिदीव्यत्तरकुलतरुणीभव्यभालेन्दुलक्ष्मी–
त्याकारादभ्रदर्पादिव कुटिलतनुं भर्त्सयन्तो मृगाङ्कम्।
लोकध्वान्ताच्छशोकप्रशमपटवो लोकनाथेन्द्रवन्द्या
भिन्द्यासुर्मान्द्यमद्य द्युमणिकरगणा द्योतितद्योविभागाः॥ १०५

कस्तूर्या मृगमदस्य भक्तिभिः पत्ररचनाभिः दीव्यत्तरम् अधिकं शोभमान कुलतरुण्याः कुलीनाया युवत्या भव्यं भाल सुन्दरं मस्तकमेव इन्दुश्चन्द्रस्तस्य लक्ष्मीः शोभेत्याकाराद् एवंप्रकाराद् अभ्रदर्पादतिगर्वात् कुटिलतनुं वक्रवपुषं मृगाङ्कं हरिणलाञ्छितं भर्त्सयन्तः इव निन्दन्त इव लोके ध्वान्तेनान्धकारेण योऽच्छशोकः प्रकामकष्टं तस्य प्रशमे अपनयने पटवो निपुणाः, द्योतिताः प्रकाशिता द्योविभागा अन्तरिक्षदेशा यैस्तथाभूता लोकनाथेन इन्द्रेण शक्रेणापि वन्द्या वन्दनीया द्युमणेः करगणाः सूर्यस्य किरणसमूहा अद्य अधुना मान्द्यं जडतां भिन्द्यासुरुच्छिन्द्यासुः। मृगमदपत्ररचनयालङ्कृतस्य कुलीनाया अङ्गनाया भव्यमस्तकस्य शोभामिव दधाना अतएव वक्रं द्वितीयाचन्द्रं निन्दन्तोऽन्धकारापनयननिपुणा इन्द्राञ्चिताः इन्द्रेण पूजिताः प्रकाशितान्तरिक्षा सूर्य- किरण-समूहा झटिति (लोकस्य) जडतोच्छेदनं कुर्वन्त्विति भावः॥

कस्तूरी के लेप से अधिकतर सुशोभित कुलीन सुन्दरी के भव्य

ललाट जैसो शोभा के कारण उद्दाम दर्पवश कुटिल आकार वाले (द्वितीया के) चन्द्रमा की भर्त्सना करते हुए, अन्धकार जनित कष्ट को दूर करने में पटु, इन्द्र द्वारा वन्दनीय गगनभाग को आलोकित करने वाले सूर्य के किरण-समूह (हमारी) मन्दता को तत्काल दूर करें।

श्री सूर्य ! श्रौमतं यद् रचितमनुचितैरप्यवद्याढ्यपद्यैः
स्तोत्रं वर्षे नृपागक्षितिसदृशि महापात्रजानीति नाम्ना।
योऽध्येत्यस्मै प्रदद्याः सदयमुदयतां कोटिशः काङ्क्षतानां
सद्यः पूर्त्यै समर्थान् दलितदुरित ! हे देव ! लक्ष्मीविलासान् ।१०६

हे दलितदुरित ! विनाशितकलुष ! सूर्यदेव ! सहापात्रोपनामकेन जानीकविना वर्णनदृष्ट्या अनुचितैरपि किन्तु काव्यगुणदृष्ट्या आढ्यै गुंणसंपन्ने (इत्थं चावद्यै रपि आढ्यैरिति विरोधाभासभासितैः) पद्यैः श्रौमतं भावत्कं यत् स्तोत्रं नृपागक्षितिसदृशि (१७११ वैक्रमे) वर्षे रचितं तद् योऽध्येति पठति अस्मै कोटिशोऽसंख्यप्रकारेणोदयतामुत्पन्नानां काङ्क्षितानामभीष्टानां सद्यः पूर्त्यै झटिति पूरणाय समर्थान् क्षमान् लक्ष्मीविकासान् श्रियां क्रीडनानि प्रदद्या वितर।

हे पापों का दलन करने वाले सूर्यदेव ! (आपके वर्णन को दृष्टि से) अनुचित और अवद्य होते हुए भो (काव्य गुणों से) सपन्न श्लोकों से आपके जिस स्तोत्र को रचना महापात्र जानी कवि ने सवत् १७११ में की, उसे जो भी पढ़े उसे असंख्य रूपों में उदित होने वाले अभीष्टों का पूरा करने में समर्थ लक्ष्मो की उपलब्धियाँ प्रदान कोजिए।

श्रीगौडान्वयमण्डले द्विजमणिस्तीर्थे प्रभासेऽभवद्
विद्वान् सन्नतगूर्जरः किल कृती श्रीनीलकण्ठाभिधः।
यः कीर्त्या सितयन् दिशो नृपतिनाऽणीरायनाम्ना निजे !
देशे स्वात्तटिनीतटे सविनयं संमान्य संस्थापितः ।।१०७

प्रभासे तीर्थे गौडान्वयमण्डनं गौडकुलभूषणं, सन्नता गुर्जरा येन तथाभूतो गुर्जरैरभिपूजित इत्यर्थः विद्वान् कृती नीलकण्ठनामा विप्रवरोऽभूत्। कीर्त्या स्वयशसा दिशो हरितः सितयन् उज्ज्वलीकुर्वन् सन् अणीरायनाम्ना नृपतिना राज्ञा सविनयं संमान्य मान प्रदाय निजे देशे स्वकीयराज्ये स्वात्तटिन्यास्तटे स्वातेतिप्रसिद्धाया नद्यास्तीरे संवासितः सम्यग् वासं कारितः।

प्रभास तीर्थं में गौडकुलभूषण, गुर्जरों से अभिवन्दित, सफल विद्वान्, नीलकण्ठ नामक विप्रवर हुआ। अपनी कीर्ति से दिशाओं को उज्ज्वल करने वाले उस ब्राह्मण को राजा अणीराय ने विनयपूर्वक सम्मानित कर अपने राज्य में स्वात नदी के तट पर बसा लिया।

तस्यात्मजोऽभूज्जयदेवनामा यः साङ्गवेदागमपारदृश्वा।

क्षितौ द्विजेभ्यो विततार विद्यां गत्वा ततो द्यां गुरवेऽपि मन्ये।

तस्य नीलकण्ठस्य जयदेवनामा साङ्गवेदानाम् आगमानां शास्त्राणां च पारदृश्वा पारङ्गतः आत्मजः सुतोऽभवत् यः क्षितौ पृथिव्यां ब्राह्मणेभ्यो द्विजेभ्यः विद्यां विततार अयच्छत् ततश्च द्यां स्वर्गं गत्वा गुरवे वृहस्पतयेऽपि विद्यां च वितत्तारेति मन्ये। उत्प्रेक्षा

उसका जयदेव नामक, साङ्गवेदों और शास्त्रों में पारङ्गत, पुत्र हुआ, जिसने पृथ्वी पर ब्राह्मणों को और तत्पश्चात् स्वर्गं जाकर मानो देवगुरु वृहस्पति को भी विद्या का दान दिया।

भारद्वाजकुलस्य याज्ञिकमणेः श्रीगौडविप्रश्रिय—

स्तस्माद् यः पुरुषोत्तमोऽजनि कविः श्रीविश्वनाथानुजः।

दिल्लीनाथसुतान्मुरादबकसात्तुष्टात्स एवाप्तवान्

कुर्वन् पद्यशतं द्रुतं किल महापात्राभिधामुज्ज्वलाम् ॥१०९

भारद्वाजगोत्रालङ्कारभूताद् याज्ञिकश्रेष्ठाद् गौडब्राह्मणशोभास्थानीयात् तस्माज्जयदेवाद् यो विश्वनाथस्यानुजः श्रेष्ठः पुरुषोऽजनि

उत्पन्न स एवाद्वितीयो द्रुतमाशु घटिकामात्रेणेति यावत् पूर्वंघोषितं पद्यशतं कुर्वंन् रचयन् दिल्लीश्वरस्य शाहेजहाँ इतिप्रसिद्धस्य सम्राजः पुत्रान्मुरादबकसात् मुरादवख्शनामकात् तदानीन्तनाद् 'गुजरात-सूवेदारात्' तुष्टात् प्रसन्नात् सतः उज्ज्वलां यशोमयीं महापात्राभिधां महापात्रेति उपाधिभूतामाख्यामाप्तवान् लेभे ॥१०६॥

भारद्वाज-कुलभूषण याज्ञिकशिरोमणि गौडविप्रालङ्कार रूप उस जयदेव से जो विश्वनाथ का अनुज श्रेष्ठ पुरुष उत्पन्न हुआ उसने सौ पद्यों की आशु रचना करके दिल्लीपति शाहजहाँ के पुत्र मुराद-बख्श से—जो कवि की रचना शक्ति से प्रसन्न हो उठा था—महापात्र नाम की श्रेष्ठ उपाधि प्राप्त की।

तेनैव जानीकविना कवीनां मुदेऽयंमारुण्यशतं व्यधायि।
स्नेहादिदं तेऽपि विभाव्य नूनं तुष्यन्तु दोषांश्च विशोधयन्तु ।११०

तेनैव जानीनामकेन कविना कवीनां मुदे हर्षाय सूर्यारुण्यशतकं रचितम्। ते सहृदयाः सूरयोऽपि नूनमवश्यमेतत् स्नेहात् प्रेम्णा न तु ईर्ष्यया विभाव्य मनसा अधीत्य तुष्यन्तु। यान् कांश्चिच्च दोषान् रचनास्खलितानि विशोधयन्तु।

उसी जानी नाम के कवि नें विद्वानों की प्रसन्नता के लिए इस सूर्यारुण्यशतक की रचना की। वे भी इसे स्नेह के साथ हृदयङ्गम करके प्रसन्न हों और त्रुटियों को शुद्ध कर लें।

इतिश्रीपण्डितराजजगन्नाथान्तेवासिमहापात्रजानीविरचितं सूर्या-रुण्यशतकं समाप्तम्। समाप्ता चगौडान्वयोद्भूतवसिष्ठगोत्रिश्रीपरमा-नन्दशास्त्रिकृता तस्य 'प्रकाशिकाख्या संस्कृतटीकाऽनुध्वनिरिति हिन्द्यामनुवादश्च।